ॐ

श्रीपरमात्मनेनमः

अथ श्रीमद्भगवद्गीता

भाषा टीका सहित

पहिला अध्याय

धृतराष्ट्र उवाच

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पांडवाश्चैव किमकुर्वत संजय ॥१॥**

पदच्छेदः ।

धर्मक्षेत्रे, कुरुक्षेत्रे, समवेताः, युयुत्सवः, मामकाः, पांडवाः, च, एव, किम्, अकुर्वत, संजय ॥

धृतराष्ट्र बोले—

अन्वयः	शब्दार्थ	अन्वयः	शब्दार्थ
संजय	= हे संजय	मामकाः	= मेरे
धर्मक्षेत्रे	= धर्मभूमि	च	= और
कुरुक्षेत्रे	= कुरुक्षेत्रमें	एव*	=
समवेताः	= इकट्ठे हुये	पांडवाः	= पांडुके पुत्रोंने
युयुत्सवः	= युद्धकी इच्छा-वाले	किम्	= क्या
		अकुर्वत	= किया

*यहां "एव" शब्द समुच्चयार्थ है

संजय उवाच

दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥२॥

दृष्ट्वा, तु, पांडवानीकं, व्यूढं, दुर्योधनः, तदा,
आचार्यम् , उपसंगम्य, राजा, वचनम् , अब्रवीत् ॥

इसपर संजय बोला—

तदा	= उस समय	दृष्ट्वा	= देखकर
राजा	= राजा	तु	= और
दुर्योधनः	= दुर्योधनने	आचार्यम्	= द्रोणाचार्यके
व्यूढम्	= व्यूहरचनायुक्त	उपसंगम्य	= पास जाकर
पांडवानीकं	= पांडवोंकी सेनाको	वचनम्	= (यह) वचन
		अब्रवीत्	= कहा

पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥३॥

पश्य, एताम् , पांडुपुत्राणाम्, आचार्य, महतीं, चमूम् ,
व्यूढाम् , द्रुपदपुत्रेण, तव, शिष्येण, धीमता ॥

आचार्य	= हे आचार्य	द्रुपदपुत्रेण	= द्रुपद पुत्र (धृष्टद्युम्न) द्वारा
तव	= आपके		
धीमता	= बुद्धिमान्	व्यूढाम्	= व्यूहाकार खड़ी की हुई
शिष्येण	= शिष्य		

पांडुपुत्राणाम् = पांडु पुत्रोंकी	महतीम् = बड़ी भारी
एताम् = इस	चमूम् = सेनाको
	पश्य = देखिये

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥४॥

अत्र, शूराः, महेष्वासाः, भीमार्जुनसमाः, युधि,
युयुधानः, विराटः, च, द्रुपदः, च, महारथः ॥

अत्र = इस (सेना) में	(सन्ति) = हैं (जैसे)
महेष्वासाः = बड़े बड़े धनुषोंवाले	युयुधानः = सात्यकि
युधि = युद्धमें	च = और
भीमार्जुनसमाः = भीम और अर्जुनके समान	विराटः = विराट
शूराः = बहुतसे शूरवीर	च = तथा
	महारथः = महारथी
	द्रुपदः = राजा द्रुपद

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ॥५॥

धृष्टकेतुः, चेकितानः, काशिराजः, च, वीर्यवान्,
पुरुजित्, कुंतिभोजः, च, शैब्यः, च, नरपुंगवः ॥

च =और
धृष्टकेतुः =धृष्टकेतु
चेकितानः =चेकितान
च =तथा
वीर्यवान् =बलवान्
काशिराजः =काशिराज
पुरुजित् = पुरुजित्
कुंतिभोजः= कुंतिभोज
च = और
नरपुंगवः = मनुष्योंमें श्रेष्ठ
शैब्यः = शैब्य ॥

युधामन्युश्चविक्रांत उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥

युधामन्युः, च, विक्रांतः, उत्तमौजाः, च, वीर्यवान्, सौभद्रः, द्रौपदेयाः, च, सर्वे, एव, महारथाः

च =और
विक्रांतः =पराक्रमी
युधामन्युः =युधामन्यु
च =तथा
वीर्यवान् =बलवान्
उत्तमौजाः=उत्तमौजा
सौभद्रः = सुभद्रा पुत्र अभिमन्यु
च =और
द्रौपदेयाः= द्रोपदीके पांचों पुत्र
सर्वे =(यह) सब
एव =ही
महारथाः =महारथी हैं

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ७

अस्माकम्, तु, विशिष्टाः, ये, तान्, निबोध, द्विजोत्तम,
नायकाः, मम, सैन्यस्य, संज्ञार्थं, तान्, ब्रवीमि, ते ॥

द्विजोत्तम	= हे ब्राह्मण श्रेष्ठ	ते	= आपके
अस्माकम्	= हमारे पक्षमें	संज्ञार्थम्	= जाननेके लिये
तु	= भी	मम	= मेरी
ये	= जो जो	सैन्यस्य	= सेनाके
विशिष्टाः	= प्रधान हैं	(ये)	= ज़ो जो
तान्	= उनको	नायकाः	= सेनापति हैं
निबोध	= (आप) समझ लीजिये	तान्	= उनको
		ब्रवीमि	= कहता हूं

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ।८।

भवान्, भीष्मः, च, कर्णः, च, कृपः, च, समितिंजयः
अश्वत्थामा, विकर्णः, च, सोमदत्तिः, तथा, एव, च, ॥

एक तो स्वयं—

भवान्	= आप	च	= और
च	= और	समितिंजयः	= संग्राम विजयी
भीष्मः	= पितामह भीष्म	कृपः	= कृपाचार्य
च	= तथा	च	= तथा
कर्णः	= कर्ण		

तथा	= वैसे	च	= और
एव	= ही	सौम-दत्तिः	= सोमदत्तका पुत्रभूरिश्रवा
अश्वत्थामा	= अश्वत्थामा		
विकर्णः	= विकर्ण		

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥९॥

अन्ये, च, बहवः, शूराः, मदर्थे, त्यक्तजीविताः,
नानाशस्त्रप्रहरणाः, सर्वे, युद्धविशारदाः ॥

तथा-

अन्ये	= और	मदर्थे	= मेरे लिये
च	= भी	त्यक्त जीविताः	= जीवनकी आशाको त्यागनेवाले
बहवः	= बहुतसे		
शूराः	= शूरवीर	सर्वे	= सबके सब
नानाशस्त्र प्रहरणाः	= अनेक प्रकारके शस्त्र अस्त्रोंसेयुक्त	युद्धवि-शारदाः	= युद्धमें चतुर हैं ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् १०

अपर्याप्तं, तत्, अस्माकम्, बलम्, भीष्माभिरक्षितम्,
पर्याप्तं, तु, इदम्, एतेषाम्, बलं, भीमाभिरक्षितम् ॥

और—

भीष्माभिरक्षितम्	= भीष्म पितामह द्वारा रक्षित	तु	= और
		भीमाभिरक्षितम्	= भीम द्वारा रक्षित
अस्माकम्	= हमारी	एतेषाम्	= इन लोगोंकी
तत्	= वह	इदम्	= यह
बलम्	= सेना	बलम्	= सेना
अपर्याप्तम्	= सब प्रकार से अजेय है	पर्याप्तम्	= जीतनेमें सुगम है

अयनेषु च सर्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥११॥

अयनेषु, च, सर्वेषु, यथाभागम्, अवस्थिताः,
भीष्मम्, एव, अभिरक्षंतु, भवंतः, सर्वे, एव, हि ॥

च	= इसलिए	सर्वे	= सबके सब
सर्वेषु	= सब	एव	= ही
अयनेषु	= मोर्चोंपर	हि	= निस्सन्देह
यथाभागम्	= अपनी अपनी जगह	भीष्मम्	= भीष्म पितामहकी
अवस्थिताः	= स्थित रहते हुए	एव	= ही
भवन्तः	= आप लोग	अभिरक्षन्तु	= सब ओरसे रक्षा करें।

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२

तस्य, संजनयन्, हर्षम्, कुरुवृद्धः, पितामहः, सिंहनादम्, विनद्य, उच्चैः, शंखम्, दध्मौ, प्रतापवान् ॥

इस प्रकार द्रोणाचार्यसे कहते हुये दुर्योधनके वचनोंको सुनकर—

कुरुवृद्धः = कौरवोंमें वृद्ध
प्रतापवान् = बड़े प्रतापी
पितामहः = पितामह-भीष्मने
तस्य = उस (दुर्योधन) के (हृदयमें)
हर्षम् = हर्ष
संजनयन् = उत्पन्न करते हुये
उच्चैः = उच्चस्वरसे
सिंहनादम् = सिंहकी नादके समान
विनद्य = गर्जकर
शंखम् = शंख
दध्मौ = बजाया

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् १३

ततः, शंखाः, च, भेर्यः, च, पणवानकगोमुखाः, सहसा, एव, अभ्यहन्यंत, सः, शब्दः, तुमुलः, अभवत् ॥

ततः = उसके उपरान्त
शंखाः = शंख
च = और
भेर्यः = नगारे
च = तथा

पणव आनक गोमुखाः	= ढोल, मृदंग और नृसिंहादि बाजे	अभ्यहन्यंत	= बजे
सहसा	= एक साथ	सः	= (उनका) वह
एव	= ही	शब्दः	= शब्द
		तुमुलः	= बड़ा भयंकर
		अभवत्	= हुआ

ततःश्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ ।
माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः १४

ततः, श्वेतैः, हयैः, युक्ते, महति, स्यंदने, स्थितौ, माधवः, पांडवः, च, एव, दिव्यौ, शंखौ, प्रदध्मतुः ॥

ततः	= इसके अनन्तर	माधवः	= श्री कृष्ण-महाराज
श्वेतैः	= सफेद	च	= और
हयैः	= घोड़ोंसे	पांडवः	= अर्जुनने
युक्ते	= युक्त	एव	= भी
महति	= उत्तम	दिव्यौ	= अलौकिक
स्यंदने	= रथमें	शंखौ	= शंख
स्थितौ	= बैठे हुये	प्रदध्मतुः	= बजाये

पांचजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ।१५

पांचजन्यम्, हृषीकेशः, देवदत्तं, धनंजयः, पौंड्रं, दध्मौ, महाशंखं, भीमकर्मा, वृकोदरः ॥

उनमें—

हृषीकेशः	=	श्रीकृष्ण महाराजने
पांचजन्यम्	=	पांचजन्य नामक शंख
धनंजयः	=	अर्जुनने
देवदत्तम्	=	देवदत्त नामक शंख (बजाया)
भीमकर्मा	=	भयानक कर्मवाले
वृकोदरः	=	भीमसेनने
पौंड्रम्	=	पौंड्र नामक
महाशंखम्	=	महाशंख
दध्मौ	=	बजाया ॥

अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१६॥

अनंतविजयम्, राजा, कुंतीपुत्रः, युधिष्ठिरः, नकुलः, सहदेवः, च, सुघोषमणिपुष्पकौ ॥

कुंतीपुत्रः	=	कुंतीपुत्र
राजा	=	राजा
युधिष्ठिरः	=	युधिष्ठिरने
अनंतविजयम्	=	अनंत विजय नामक शंख (और)
नकुलः	=	नकुल
च	=	तथा
सहदेवः	=	सहदेवने
सुघोषमणिपुष्पकौ	=	सुघोष और मणिपुष्पक नामवाले शंख (बजाये)

काश्यश्च परमेष्वासः शिखंडी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ।१७

काश्यः, च, परमेष्वासः, शिखंडी, च, महारथः, धृष्टद्युम्नः, विराटः, च, सात्यकिः, च, अपराजितः ॥

परमेष्वासः	= श्रेष्ठ धनुषवाले	धृष्टद्युम्नः	= धृष्टद्युम्न
काश्यः	= काशिराज	च	= तथा
च	= और	विराटः	= राजा विराट
महारथः	= महारथी	च	= और
शिखंडी	= शिखंडी	अपराजितः	= अजेय
च	= और	सात्यकिः	= सात्यकि

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक् पृथक्॥

द्रुपदः, द्रौपदेयाः, च, सर्वशः, पृथिवीपते, सौभद्रः, च, महाबाहुः, शंखान्, दध्मुः, पृथक्, पृथक् ॥ १८ ॥

तथा–

द्रुपदः	= राजा द्रुपद	द्रौपदेयाः	= द्रौपदीके पांचों पुत्र
च	= और		

च	= और	पृथिवीपते	= हे राजन्
महाबाहुः	= बड़ी भुजावाला	पृथक्	= अलग
		पृथक्	= अलग
सौभद्रः	= सुभद्रापुत्र अभिमन्यु	शंखान्	= शंख
		दध्मुः	= बजाये ॥
सर्वशः	= इन सबने		

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् । १९

सः, घोषः, धार्तराष्ट्राणाम्, हृदयानि, व्यदारयत्, नभः, च, पृथिवीम्, च, एव, तुमुलः, व्यनुनादयन् ॥

च	= और	व्यनुनादयन्	= शब्दायमान करते हुए
सः	= उस		
तुमुलः	= भयानक	धार्तराष्ट्राणाम्	= धृतराष्ट्र पुत्रोंके
घोषः	= शब्दने		
नभः	= आकाश	हृदयानि	= हृदय
च	= और	व्यदारयत्	= विदीर्ण कर दिये
पृथिवीम्	= पृथिवीको		
एव	= भी		

अथ व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥२०॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ।२१

अथ, व्यवस्थितान्, दृष्ट्वा, धार्तराष्ट्रान्, कपिध्वजः, प्रवृत्ते, शस्त्रसंपाते, धनुः, उद्यम्य, पांडवः, हृषीकेशं, तदा, वाक्यम्, इदम्, आह, महीपते, सेनयोः, उभयोः, मध्ये, रथम्, स्थापय, मे, अच्युत ॥

महीपते = हे राजन्
अथ = उसके उपरांत
कपिध्वजः = कपिध्वज
पांडवः = अर्जुनने
व्यवस्थितान् = खड़े हुए
धार्तराष्ट्रान् = धृतराष्ट्र पुत्रोंको
दृष्ट्वा = देखकर
तदा = उस
शस्त्रसंपाते = शस्त्रचलने-
प्रवृत्ते = की तैयारी-के समय
धनुः = धनुष
उद्यम्य = उठाकर
हृषीकेशं = हृषीकेश श्रीकृष्ण महाराजसे
इदम् = यह
वाक्यम् = वचन
आह = कहा,
अच्युत = हे अच्युत
मे = मेरे
रथम् = रथको
उभयोः = दोनों
सेनयोः = सेनाओंके
मध्ये = बीचमें
स्थापय = खड़ा करिए

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ।२२।

यावत्, एतान्, निरीक्षे, अहम्, योद्धुकामान्, अवस्थितान्, कैः, मया, सह, योद्धव्यम्, अस्मिन्, रणसमुद्यमे ॥

यावत् = जबतक	अस्मिन् = इस
अहम् = मैं	रणसमुद्यमे = युद्धरूप व्यापारमें
एतान् = इन	मया = मुझे
अवस्थितान् = स्थित हुए	कैः = किन २ के
योद्धुकामान् = युद्धकी कामना वालोंको	सह = साथ
निरीक्षे = अच्छी प्रकार देखलूं कि	योद्धव्यम् = युद्ध करना योग्य है

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ।२३।

योत्स्यमानान्, अवेक्षे, अहम्, ये, एते, अत्र, समागताः, धार्तराष्ट्रस्य, दुर्बुद्धेः, युद्धे, प्रियचिकीर्षवः ॥

और-

दुर्बुद्धेः	=दुर्बुद्धि	अत्र	= इस सेनामें
धार्तराष्ट्रस्य	=दुर्योधनका	समागताः	= आये हैं
युद्धे	=युद्धमें	(तान्)	= उन
प्रियचि- कीर्षवः	= कल्याण चाहनेवाले	योत्स्य- मानान्	= युद्ध करने वालोंको
ये	=जो जो	अहम्	= मैं
एते	=ये राजालोग	अवेक्षे	= देखूंगा

संजय उवाच

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् २४
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति २५

एवम्, उक्तः, हृषीकेशः, गुडाकेशेन, भारत, सेनयोः, उभयोः, मध्ये, स्थापयित्वा, रथोत्तमम्, भीष्मद्रोणप्रमुखतः, सर्वेषाम्, च, महीक्षिताम्, उवाच, पार्थ, पश्य, एतान्, समवेतान्, कुरून्, इति ॥

संजय बोला-

भारत	=हे धृतराष्ट्र	एवम्	=इस प्रकार
गुडाकेशेन	=अर्जुन द्वारा	उक्तः	=कहे हुए

हृषीकेशः	= महाराज श्रीकृष्णचन्द्रने	महीक्षिताम्	= राजाओंके सामने
		रथोत्तमम्	= उत्तम रथको
उभयोः	= दोनों	स्थापयित्वा	= खड़ा करके
सेनयोः	= सेनाओंके	इति	= ऐसे
मध्ये	= बीचमें	उवाच	= कहा कि
भीष्मद्रोणप्रमुखतः	= भीष्म और द्रोणाचार्य के सामने	पार्थ	= हे पार्थ
		एतान्	= इन
		समवेतान्	= इकट्ठे हुए
च	= और	कुरून्	= कौरवोंको
सर्वेषाम्	= संपूर्ण	पश्य	= देख

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्
आचार्यान्मातुलान्भ्रातॄन्
पुत्रान्पौत्रान्सखींस्तथा ॥२६॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥

तत्र, अपश्यत्, स्थितान्, पार्थः, पितॄन्, अथ, पितामहान्, आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन्, तथा, श्वशुरान्, सुहृदः, च, एव, सेनयोः, उभयोः, अपि ॥

अथ	= उसके उपरान्त	उभयोः	= दोनों
पार्थः	= पृथापुत्र अर्जुनने	अपि	= ही
तत्र	= उन	सेनयोः	= सेनाओंमें

स्थितान्	=स्थित हुए	पौत्रान्	=पौत्रोंको
पितॄन्	=पिताके भाइयोंको	तथा	=तथा
		सखीन्	=मित्रोंको
पितामहान्	=पितामहोंको	श्वशुरान्	=ससुरोंको
आचार्यान्	=आचार्योंको	च	=और
मातुलान्	=मामोंको	सुहृदः	=सुहृदोंको
भ्रातॄन्	=भाइयोंको	एव	=भी
पुत्रान्	=पुत्रोंको	अपश्यत्	=देखा

तान्समीक्ष्य सकौंतेयः सर्वान्बंधूनवस्थितान्
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

तान्,समीक्ष्य,सः,कौंतेयः,सर्वान्,बंधून्,अवस्थितान् २७॥
कृपया, परया, आविष्टः, विषीदन्, इदम्, अब्रवीत् ॥

इस प्रकार—

तान्	=उन	कृपया	=करुणासे
अवस्थितान्	=खड़े हुये	आविष्टः	=युक्त हुआ
सर्वान्	=संपूर्ण	कौंतेयः	=कुंतीपुत्र अर्जुन
बंधून्	=बन्धुओंको	विषीदन्	=शोक करता हुआ
समीक्ष्य	=देखकर		
सः	=वह	इदम्	=यह
परया	=अत्यन्त	अब्रवीत्	=बोला

अर्जुन उवाच

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।
सीदंति मम गात्राणि मुखं च परिशुष्यति
वेपथुश्च शरीरेमे रोमहर्षश्च जायते ॥२९॥

दृष्ट्वा, इमम्, स्वजनम्, कृष्ण, युयुत्सुम्, समुपस्थितम् ॥२८
सीदंति, मम, गात्राणि, मुखम्, च, परिशुष्यति, वेपथुः,
च, शरीरे, मे, रोमहर्षः, च, जायते ॥

कृष्ण = हे कृष्ण
इमम् = इस
युयुत्सुम् = युद्धकी इच्छावाले
समुपस्थितम् = खड़े हुये
स्वजनम् = स्वजन समुदायको
दृष्ट्वा = देखकर
मम = मेरे
गात्राणि = अंग
सीदंति = शिथिल हुये जाते हैं
च = और
मुखम् = मुख (भी)
परिशुष्यति = सूखा जाता है
च = और
मे = मेरे
शरीरे = शरीरमें
वेपथुः = कम्प
च = तथा
रोमहर्षः = रोमांच
जायते = होता है ॥

गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥३०

गांडीवम्, स्रंसते, हस्तात्, त्वक्, च, एव, परिदह्यते,
न, च, शक्नोमि, अवस्थातुम्, भ्रमति, इव, च, मे, मनः ॥

तथा-

हस्तात्	=हाथसे	मे	=मेरा
गांडीवम्	=गांडीव धनुष	मनः	=मन
स्रंसते	=गिरता है	भ्रमतिइव	=भ्रमित सा हो रहा है
च	=और		
त्वक्	=त्वचा	(अतः)	=इसलिये(मैं)
एव	=भी	अवस्थातुं	=खड़ा रहनेको
परिदह्यते	=बहुत जलती है	च	=भी
		न शक्नोमि	=समर्थ नहींहूं
च	= तथा		

निमित्तानि च पश्यामि विपरीतानि केशव न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ३१

निमित्तानि, च, पश्यामि, विपरीतानि, केशव, न, च,
श्रेयः, अनुपश्यामि, हत्वा, स्वजनम्, आहवे ॥

और-

केशव	=हे केशव	पश्यामि	=देखता हूं
निमित्तानि	=लक्षणोंको	आहवे	=(तथा)युद्धमें
च	=भी	स्वजनम्	=अपनेकुलको
विपरीतानि	=विपरीत(ही)	हत्वा	=मारकर

श्रेयः	=कल्याण	न	=नहीं
च	=भी	अनुपश्यामि	=देखता

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च
किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा

न, कांक्षे, विजयम्, कृष्ण, न, च, राज्यं, सुखानि, च,
किं, नः, राज्येन, गोविन्द, किं,भोगैः,जीवितेन, वा ॥३२

और–

कृष्ण	=हे कृष्ण	(कांक्षे)	=चाहता
विजयम्	=(मैं)विजयको	गोविन्द	=हे गोविन्द
न	=नहीं	नः	=हमें
कांक्षे	=चाहता	राज्येन	=राज्यसे
च	=और	किम्	=क्या(प्रयोजनहै)
राज्यम्	=राज्य	वा	=अथवा
च	=तथा	भोगैः	=भोगोंसे (और)
सुखानि	=सुखोंको(भी)	जीवितेन	=जीवनसे (भी)
न	=नहीं	किम्	=क्या(प्रयोजन है)

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च
त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च

येषाम्, अर्थे, कांक्षितम्, नः, राज्यम्, भोगाः, सुखानि,
च, ते, इमे, अवस्थिताः, युद्धे, प्राणान्, त्यक्त्वा,
धनानि, च ॥३३॥

क्योंकि—

नः	=हमें	इमे	=यह सब
येषाम्	=जिनके	धनानि	=धन
अर्थे	=लिये	च	=और
राज्यम्	=राज्य	प्राणान्	=जीवन(की आशा)को
भोगाः	=भोग	त्यक्त्वा	=त्यागकर
च	=और	युद्धे	=युद्धमें
सुखानि	=सुखादिक	अवस्थिताः	=खड़े हैं
कांक्षितम्	=इच्छित हैं		
ते	=वे (ही)		

आचार्याः पितरः पुत्रास्तथैव च पितामहाः
मातुलाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्तथा

आचार्याः, पितरः, पुत्राः, तथा, एव, च, पितामहाः,
मातुलाः, श्वशुराः,पौत्राः, श्यालाः,संबंधिनः, तथा ॥३४॥

जोकि—

आचार्याः	=गुरुजन	श्वशुराः	=ससुर
पितरः	=ताऊ चाचे	पौत्राः	=पोते
पुत्राः	=लड़के	श्यालाः	=साले
च	=और	तथा	=तथा (और भी)
तथा	=वैसे	संबंधिनः	=संबंधी लोग हैं ॥
एव	=ही		
पितामहाः	=दादा		
मातुलाः	=मामा		

एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किंनु महीकृते

एतान्, न, हंतुम्, इच्छामि, घ्नतः, अपि, मधुसूदन, अपि, त्रैलोक्यराज्यस्य, हेतोः, किंनु, महीकृते ॥३५॥

इसलिये—

मधुसूदन	=हे मधुसूदन	एतान्	=इन (सब)को
घ्नतः	=(मुझे)मारनेपर	हन्तुम्	=मारना
अपि	=भी (अथवा)	न	=नहीं
त्रैलोक्य-राज्यस्य	={तीन लोकके राज्यके	इच्छामि	=चाहता
हेतोः	=लिये	महीकृते	={(फिर) पृथिवीके लिये(तो)
अपि	=भी (मैं)	नु किम्	=कहनाही क्या है

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥३६

निहत्य, धार्तराष्ट्रान्, नः, का, प्रीतिः, स्यात्, जनार्दन, पापम्, एव, आश्रयेत्, अस्मान्, हत्वा, एतान्, आततायिनः ॥

जनार्दन	=हे जनार्दन	निहत्य	=मारकर (भी)
धार्तराष्ट्रान्	={धृतराष्ट्रके पुत्रोंको	नः	=हमें
		का	=क्या

प्रीतिः	=प्रसन्नता	हत्वा	=मारकर (तो)
स्यात्	=होगी	अस्मान्	=हमें
एतान्	=इन	पापम्	=पाप
आतता-यिनः	=आतता-यियोंको	एव	=ही
		आश्रयेत्	=लगेगा

तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रान्स्वबांधवान्।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥

तस्मात्, न, अर्हाः; वयम्, हंतुम्, धार्तराष्ट्रान्, स्वबां-धवान्, स्वजनम्; हि, कथम्, हत्वा, सुखिनः, स्याम, माधव ॥३७॥

तस्मात्	=इससे	न अर्हाः	=योग्य नहीं है
माधव	=हे माधव	हि	=क्योंकि
स्वबांधवान्	=अपने बांधव	स्वजनम्	=अपने कुटुम्बको
धार्तराष्ट्रान्	=धृतराष्ट्रके पुत्रोंको	हत्वा	=मारकर (हम)
		कथम्	=कैसे
हंतुम्	=मारनेकेलिये	सुखिनः	=सुखी
वयम्	=हम	स्याम	=होंगे

यद्यप्येते न पश्यंति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ३८

यद्यपि, एते, न पश्यंति, लोभोपहतचेतसः, कुलक्षयकृ-तम्, दोषम्, मित्रद्रोहे, च, पातकम् ॥

यद्यपि	=यद्यपि	च	= और
लोभोपहत-चेतसः	=लोभसे भ्रष्ट चित्त हुए	मित्रद्रोहे	=मित्रोंके साथ विरोध करनेमें
एते	=यह लोग	पातकम्	= पापको
कुलक्षय-कृतम्	=कुलके नाश कृत	न	= नहीं
दोषम्	=दोषको	पश्यंति	= देखते हैं

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥३९॥

कथम्, न, ज्ञेयम्, अस्माभिः, पापात्, अस्मात्, निवर्तितुम्, कुलक्षयकृतम्, दोषम्, प्रपश्यद्भिः, जनार्दन ॥

परन्तु-

जनार्दन	=हे जनार्दन	अस्मात्	=इस
कुलक्षय-कृतम्	=कुलके नाश करनेसे होते हुए	पापात्	=पापसे
		निवर्तितुम्	=हटनेकेलिये
		कथम्	=क्यों
दोषम्	=दोषको	न	=नहीं
प्रपश्यद्भिः	=जाननेवाले	ज्ञेयम्	=विचार करना चाहिये
अस्माभिः	=हमलोगोंको		

कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः
धर्मे नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत॥४०॥

कुलक्षये, प्रणश्यंति, कुलधर्माः, सनातनाः, धर्मे, नष्टे, कुलम्, कृत्स्नम्, अधर्मः, अभिभवति, उत ॥

क्योंकि-

कुलक्षये	= कुलके नाश होनेसे	नष्टे	= नाश होनेसे
सनातनाः	= सनातन	कृत्स्नम्	= संपूर्ण
कुलधर्माः	= कुलधर्म	कुलम्	= कुलको
प्रणश्यंति	= नष्ट हो जाते हैं	अधर्मः	= पाप
धर्मे	= धर्मके	उत	= भी
		अभिभवति	= बहुत दबा लेता है

अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥४१॥

अधर्माभिभवात्, कृष्ण, प्रदुष्यंति, कुलस्त्रियः, स्त्रीषु, दुष्टासु, वार्ष्णेय, जायते, वर्णसंकरः ॥

तथा-

कृष्ण	= हे कृष्ण	प्रदुष्यंति	= दूषित होजाती हैं (और)
अधर्म-अभिभवात्	= पापके अधिक बढ़ जानेसे	वार्ष्णेय	= हे वार्ष्णेय
कुलस्त्रियः	= कुलकी स्त्रियां	स्त्रीषु	= स्त्रियोंके
		दुष्टासु	= दूषित होनेपर
		वर्णसंकरः	= वर्णसंकर
		जायते	= उत्पन्नहोता है

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः॥४२॥

संकरः, नरकाय, एव, कुलघ्नानाम्, कुलस्य, च, पतंति,
पितरः, हि, एषाम्, लुप्तपिंडोदकक्रियाः ॥

और वह—

संकरः = वर्णसंकर
कुलघ्नानाम् = कुलघातियोंको
च = और
कुलस्य = कुलको
नरकाय = नरकमें ले जानेके लिये
एव = ही (होता है)
लुप्तपिंडोदकक्रियाः = लोप हुई पिंड और जलकी क्रियावाले
एषाम् = इनके
पितरः = पितरलोग
हि = भी
पतंति = गिर जाते हैं

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः

दोषैः, एतैः, कुलघ्नानाम्, वर्णसंकरकारकैः, उत्साद्यंते,
जातिधर्माः, कुलधर्माः, च, शाश्वताः ॥४३॥

और—

एतैः = इन
वर्णसंकरकारकैः = वर्ण संकर कारक
दोषैः = दोषोंसे
कुलघ्नानाम् = कुलघातियोंके

शाश्वताः	=सनातन	जातिधर्माः	=जाति धर्म
कुलधर्माः	=कुलधर्म	उत्साद्यंते	=नष्ट हो जाते हैं
च	=और		

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४४

उत्सन्नकुलधर्माणाम्, मनुष्याणाम्, जनार्दन, नरके, अनियतम्, वासः, भवति, इति, अनुशुश्रुम ॥

तथा–

जनार्दन	=हे जनार्दन	नरके	=नरकमें
उत्सन्नकुलधर्माणाम्	=नष्ट हुए कुलधर्मवाले	वासः	=वास
		भवति	=होता है
मनुष्याणाम्	=मनुष्योंका	इति	=ऐसा
अनियतम्	=अनन्त कालतक	अनुशुश्रुम	=(हमने) सुना है

अहो बत महत्पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः॥४५॥

अहो, बत, महत्पापम्, कर्तुम्, व्यवसिताः, वयम्, यत्, राज्यसुखलोभेन, हंतुम्, स्वजनम्, उद्यताः ॥

अहो	=अहो	यत्	=जो कि
बत	=शोक है कि	राज्यसुख-लोभेन	=राज्य और सुख के लोभसे
वयम्	=हमलोग (बुद्धिमान् होकर भी)	स्वजनम्	=अपने कुलको
महत्पापम्	=महान् पाप	हंतुम्	=मारनेकेलिये
कर्तुम्	=करनेको	उद्यताः	=उद्यत हुए हैं
व्यवसिताः	=तैयार हुए हैं		

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥४६

यदि, माम्, अप्रतीकारम्, अशस्त्रम्, शस्त्रपाणयः, धार्तराष्ट्राः, रणे, हन्युः, तत्, मे, क्षेमतरम्, भवेत्, ॥

यदि	=यदि	रणे	=रणमें
माम्	=मुझ	हन्युः	=मारें (तो)
अशस्त्रम्	=शस्त्ररहित	तत्	=वह (मारना भी)
अप्रतीकारम्	=न सामना करनेवालेको	मे	=मेरे लिये
शस्त्रपाणयः	=शस्त्रधारी	क्षेमतरम्	=अतिकल्याण कारक
धार्तराष्ट्राः	=धृतराष्ट्रके पुत्र	भवेत्	= होगा ॥

संजय उवाच

एवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत्
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७

एवम्, उक्त्वा, अर्जुनः, संख्ये, रथोपस्थे, उपाविशत्, विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः ॥

संजय बोला कि—

संख्ये	=रणभूमिमें	सशरम्	=बाण सहित
शोकसंवि-ग्नमानसः	=शोकसे उद्विग्न मनवाला	चापम्	=धनुषको
		विसृज्य	=त्यागकर
		रथोपस्थे	=रथके पिछले भागमें
अर्जुनः	=अर्जुन		
एवम्	=इस प्रकार	उपाविशत्	=बैठ गया ॥
उक्त्वा	=कहकर		

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायाम् योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुन विषादयोगोनाम प्रथमोऽध्यायः ॥१॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्र विषयक श्रीकृष्ण और अर्जुनके संवादमें "अर्जुन विषादयोग" नामक पहिला अध्याय !

ॐ

श्रीपरमात्मनेनमः

अथ द्वितीयोऽध्यायः

संजय उवाच

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥१॥

तम्, तथा, कृपया, आविष्टम्, अश्रुपूर्णाकुलेक्षणम्, विषीदंतम्, इदम्, वाक्यम्, उवाच, मधुसूदनः ॥

संजय बोला कि–

तथा	= पूर्वोक्त प्रकारसे	तम्	= उस (अर्जुन)के प्रति
कृपया	= करुणा करके		
आविष्टम्	= व्याप्त (और)	मधुसूदनः	= भगवान् मधुसूदनने
अश्रुपूर्णाकुलेक्षणम्	= आंसुओंसेपूर्ण (तथा) व्याकुल नेत्रोंवाले	इदम्	= यह
		वाक्यम्	= वचन
विषीदंतम्	= शोकयुक्त	उवाच	= कहा

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन ॥२॥

कुतः, त्वा, कश्मलम्, इदम्, विषमे, समुपस्थितम्, अनार्यजुष्टम्, अस्वर्ग्यम्, अकीर्त्तिकरम्, अर्जुन ॥

अर्जुन	= हे अर्जुन	अनार्यजुष्टम्	= न तो श्रेष्ठ पुरुषोंसे आचरण किया गया है
त्वा	= तुमको	अस्वर्ग्यम्	= न स्वर्गको देनेवाला है
विषमे	= (इस) विषमस्थलमें	अकीर्त्तिकरम्	= न कीर्त्तिको करनेवाला है
इदम्	= यह		
कश्मलम्	= अज्ञान		
कुतः	= किस हेतुसे		
समुपस्थितम्	= प्राप्त हुआ		
(यतः)	= क्योंकि (यह)		

क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥३॥

क्लैब्यम्, मास्मगमः, पार्थ, न, एतत्, त्वयि, उपपद्यते, क्षुद्रम्, हृदयदौर्बल्यम्, त्यक्त्वा, उत्तिष्ठ, परंतप ॥

इसलिये—

पार्थ	= हे अर्जुन	त्वयि	= तेरेमें
क्लैब्यम्	= नपुंसकताको	न उपपद्यते	= योग्य नहीं है
मास्मगमः	= मत प्राप्त हो	परंतप	= हे परंतप
एतत्	= यह	क्षुद्रम्	= तुच्छ

हृदयदौर्बल्यम्	= हृदयकी दुर्बलताको	उत्तिष्ठ	= युद्धके लिये खड़ा हो
त्यक्त्वा	= त्यागकर		

अर्जुन उवाच

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥४॥

कथम्, भीष्मम्, अहम्, संख्ये, द्रोणम्, च, मधुसूदन, इषुभिः, प्रति, योत्स्यामि, पूजार्हौ, अरिसूदन ॥

तब अर्जुन बोला कि—

मधुसूदन	= हे मधुसूदन	कथम्	= किस प्रकार
अहम्	= मैं	इषुभिः	= बाणों करके
संख्ये	= रणभूमिमें	योत्स्यामि	= युद्ध करूंगा
भीष्मम्	= भीष्मपितामह	(यतः)	= क्योंकि
च	= और	अरिसूदन	= हे अरिसूदन
द्रोणम्	= द्रोणाचार्यके	(तौ)	= वे दोनों (ही)
प्रति	= प्रति	पूजार्हौ	= पूजनीय हैं

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुंजीय भोगान्रुधिरप्रदिग्धान् ॥५॥

गुरून्, अहत्वा, हि, महानुभावान्, श्रेयः, भोक्तुम्, भैक्ष्यम्, अपि, इह,लोके, हत्वा, अर्थकामान्, तु, गुरून्, इह, एव, भुंजीय, भोगान्, रुधिरप्रदिग्धान् ॥

इसलिये इन—

महानुभावान्	=महानुभाव
गुरून्	=गुरुजनोंको
अहत्वा	=न मारकर
इह	=इस
लोके	=लोकमें
भैक्ष्यम्	=भिक्षाका अन्न
अपि	=भी
भोक्तुम्	=भोगना
श्रेयः	=कल्याणकारक (समझता हूं)
हि	=क्योंकि

गुरून्	=गुरुजनोंको
हत्वा	=मारकर
(अपि)	=भी
इह	=इस लोकमें
रुधिरप्रदिग्धान्	=रुधिरसे सने हुए
अर्थकामान्	=अर्थ और काम रूप
भोगान्	=भोगोंको
एव	=ही
तु	=तो
भुंजीय	=भोगूंगा

नचैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

न, च, एतत्, विद्मः, कतरत्, नः, गरीयः, यद्वा, जयेम, यदि, वा, नः, जयेयुः, यान्, एव, हत्वा, न, जिजीविषामः, ते, अवस्थिताः, प्रमुखे, धार्तराष्ट्राः ॥

और हमलोग–

एतत्	=यह	जयेयुः	=वे जीतेंगे (और)
च	=भी	यान्	=जिनको
न	=नहीं	हत्वा	=मारकर (हम)
विद्मः	=जानते (कि)	न जिजी-विषामः	=जीना भी नहीं चाहते
नः	=हमारे लिये	ते	=वे
कतरत्	=क्या (करना)	एव	=ही
गरीयः	=श्रेष्ठ है	धार्तरा-ष्ट्राः	=धृतराष्ट्र के पुत्र
यद्वा	=अथवा (यह भी नहीं जानते कि)	प्रमुखे	=हमारे सामने
जयेम	=हम जीतेंगे	अव-स्थिताः	=खड़े हैं
यदि वा	=या		
नः	=हमको		

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥

कार्पण्यदोषोपहतस्वभावः, पृच्छामि, त्वाम्, धर्मसंमूढचेताः, यत्, श्रेयः, स्यात्, निश्चितम्, ब्रूहि, तत्, मे, शिष्यः, ते, अहम्, शाधि, मां, त्वां, प्रपन्नम् ॥

इसलिये-

कार्पण्यदोष उपहत स्वभावः	= कायरता रूप दोष करके उपहत हुये स्वभाववाला (और)	स्यात्	= हो
		तत्	= वह
		मे	= मेरे लिये
		ब्रूहि	= कहिये (क्योंकि)
धर्मसंमूढचेताः	= धर्मके विषय में मोहित चित्तहुआ (मैं)	अहम्	= मैं
		ते	= आपका
		शिष्यः	= शिष्य हूं (इसलिये)
त्वाम्	= आपको	त्वाम्	= आपके
पृच्छामि	= पूछता हूं	प्रपन्नम्	= शरण हुये
यत्	= जो (कुछ)	माम्	= मेरेको
निश्चितम्	= निश्चय किया हुआ	शाधि	= शिक्षा दीजिये
श्रेयः	= कल्याणकारक साधन		

न हि प्रपश्यामि ममापनुद्याद्

यच्छोकमुच्छोषणमिंद्रियाणाम् ।

अवाप्य भूमावसपत्नमृद्धं ।
राज्यं सुराणामपि चाधिपत्यम् ॥८॥

न, हि, प्रपश्यामि, मम, अपनुद्यात्, यत्, शोकम्, उच्छोषणम्, इंद्रियाणाम्, अवाप्य, भूमौ, असपत्नम्, ऋद्धम्, राज्यम्, सुराणाम्, अपि, च, आधिपत्यम् ॥

हि	=क्योंकि	न	=नहीं
भूमौ	=भूमिमें	प्रपश्यामि	=देखता हूं
असपत्नम्	=निष्कंटक	यत्	=जो कि
ऋद्धम्	=धनधान्यसंपन्न	मम	=मेरी
राज्यम्	=राज्यको	इंद्रियाणाम्	=इंद्रियोंके
च	=और	उच्छोषणम्	=सुखानेवाले
सुराणाम्	=देवताओंके	शोकम्	=शोकको
आधिपत्यम्	=स्वामीपनेको	अपनुद्यात्	=दूरकर सके
अवाप्य	=प्राप्त होकर		
अपि	=भी (मैं)		
(तत्)	=उस(उपाय)को		

संजय उवाच

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥

एवम्, उक्त्वा, हृषीकेशं, गुडाकेशः, परंतप, न, योत्स्ये, इति, गोविंदम्, उक्त्वा, तूष्णीम्, बभूव, ह ॥९॥

संजय बोला—

परंतप	= हे राजन्	गोविन्दम्	= श्रीगोविन्द भगवान्को
गुडाकेशः	= निद्राको जीतनेवाला अर्जुन	न योत्स्ये	= युद्ध नहीं करूंगा
हृषीकेशम्	= अंतर्यामी श्रीकृष्ण महाराजके प्रति	इति	= ऐसे
		ह	= स्पष्ट
		उक्त्वा	= कहकर
एवम्	= इस प्रकार	तूष्णीम्	= चुप
उक्त्वा	= कहकर (फिर)	बभूव	= हो गया॥

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः॥१०॥

तम्, उवाच, हृषीकेशः, प्रहसन्, इव, भारत, सेनयोः, उभयोः, मध्ये, विषीदंतम्, इदम्, वचः,

उसके उपरान्त—

भारत	= हे भरतवंशी धृतराष्ट्र	तम्	= उस
हृषीकेशः	= अंतर्यामी श्रीकृष्ण महाराजने	विषीदंतम्	= शोकयुक्त अर्जुनको
		प्रहसन् इव	= हंसते हुएसे
उभयोः	= दोनों	इदम्	= यह
सेनयोः	= सेनाओंके	वचः	= वचन
मध्ये	= बीचमें	उवाच	= कहा

श्रीभगवानुवाच

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥११

अशोच्यान्, अन्वशोचः, त्वम्, प्रज्ञावादान्, च, भाषसे, गतासून्, अगतासून्, च, न, अनुशोचंति, पंडिताः ॥

हे अर्जुन—

त्वम्	=	तूं
अशोच्यान्	=	न शोक करने योग्योंके लिये
अन्वशोचः	=	शोक करता है
च	=	और
प्रज्ञावादान्	=	पंडितोंके(से) वचनोंको
भाषसे	=	कहता है (परन्तु)
पंडिताः	=	पंडितजन
गतासून्	=	जिनके प्राण चले गये हैं उनके लिये
च	=	और
अगतासून्	=	जिनके प्राण नहीं गये हैं उनके लिये (भी)
न	=	नहीं
अनुशोचंति	=	शोक करते हैं ॥

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम् १२

न, तु, एव, अहम्, जातु, न, आसम्, न, त्वम्, न, इमे, जनाधिपाः, न, च, एव, न, भविष्यामः, सर्वे, वयम्, अतः, परम् ॥

क्योंकि आत्मा नित्य है इसलिये शोक करना अयुक्त है। वास्तवमें-

न =न
तु =तो
(एवम्) =ऐसा
एव =ही (है कि)
अहम् =मैं
जातु =किसी कालमें
न =नहीं
आसम् =था (अथवा)
त्वम् =तूं
न =नहीं
(आसीः) =था (अथवा)
इमे =यह
जनाधिपाः=राजा लोग

न =नहीं
(आसन्)=थे
च =और
न =न
(एवम्) =ऐसा
एव =ही (है कि)
अतः =इससे
परम् =आगे
वयम् =हम
सर्वे =सब
न =नहीं
भविष्यामः=रहेंगे

देहिनोऽस्मिन्यथा देहे कौमारं यौवनंजरा।
तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥

देहिनः, अस्मिन्, यथा, देहे, कौमारम्, यौवनम्, जरा, तथा, देहांतरप्राप्तिः, धीरः, तत्र, न, मुह्यति ॥

किन्तु-

यथा =जैसे
देहिनः =जीवात्माकी
अस्मिन् =इस

देहे =देहमें
कौमारम्=कुमार
यौवनम् =युवा (और)

जरा	=वृद्ध अवस्था (होती है)	तत्र	=उस विषयमें
		धीरः	=धीर पुरुष
तथा	=वैसे ही	न	=नहीं
देहांतर-प्राप्तिः	=अन्य शरीरकी प्राप्ति होती है	मुह्यति	=मोहित होता है

अर्थात् जैसे कुमार, युवा और जरा अवस्था रूप स्थूल शरीरका विकार अज्ञानसे आत्मामें भासता है वैसे ही एक शरीरसे दूसरे शरीरको प्राप्त होना रूप सूक्ष्म शरीरका विकार भी अज्ञानसे ही आत्मामें भासता है इसलिये तत्त्वको जाननेवाला धीरपुरुष इस विषयमें नहीं मोहित होता है।

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः
आगमापायिनोनित्यास्तांस्तितिक्षस्व भारत

मात्रास्पर्शाः, तु, कौंतेय, शीतोष्णसुखदुःखदाः, आगमापायिनः, अनित्याः, तान्, तितिक्षस्व, भारत ॥१४॥

कौंतेय	= हे कुंतीपुत्र	तु	=तो
शीतोष्ण-सुख-दुःखदाः	=सर्दी गर्मी और सुख दुःखको देनेवाले	आगमा-पायिनः	=क्षणभंगुर (और)
		अनित्याः	=अनित्य हैं (इसलिये)
मात्रा-स्पर्शाः	=इन्द्रिय और विषयोंके संयोग	भारत	=हे भरत वंशी अर्जुन

तान् = उनको (तूं)	तितिक्षस्व = सहन कर

यंहि न व्यथयंत्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५

यम्, हि, न, व्यथयंति, एते, पुरुषं, पुरुषर्षभ, समदुःखसुखं, धीरम्, सः, अमृतत्वाय, कल्पते ॥

हि	= क्योंकि	एते	= यह (इन्द्रियों-के विषय)
पुरुषर्षभ	= हे पुरुषश्रेष्ठ		
समदुःखसुखम्	= दुःखसुखको समान समझनेवाले	न व्यथयन्ति	= व्याकुल नहीं कर सकते
		सः	= वह
यम्	= जिस	अमृतत्वाय	= मोक्षके लिये
धीरम्	= धीर		
पुरुषम्	= पुरुषको	कल्पते	= योग्य होता है

नासतो विद्यतेभावो नाभावो विद्यतेसतः ।
उभयोरपि दृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः १६

न, असतः, विद्यते, भावः, न, अभावः, विद्यते, सतः, उभयोः, अपि, दृष्टः, अन्तः, तु, अनयोः, तत्त्वदर्शिभिः ॥

और हे अर्जुन–

असतः	= असत् (वस्तु) का तो	भावः	= अस्तित्व
		न	= नहीं

विद्यते	= है	उभयोः	= दोनोंका
तु	= और	अपि	= ही
सतः	= सत्‌का	अन्तः	= तत्त्व
अभावः	= अभाव	तत्त्वदर्शिभिः	= ज्ञानी पुरुषों द्वारा
न	= नहीं	दृष्टः	= देखा गया है
विद्यते	= है (इसप्रकार)		
अनयोः	= इन		

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥

अविनाशि, तु, तत्, विद्धि, येन, सर्वम्, इदम्, ततम्, विनाशम्, अव्ययस्य, अस्य, न, कश्चित्, कर्तुम्, अर्हति ॥१७॥

इस न्यायके अनुसार—

अविनाशि	= नाश रहित	ततम्	= व्याप्त है
तु	= तो	अस्य	= (क्योंकि) इस
तत्	= उसको	अव्ययस्य	= अविनाशीका
विद्धि	= जान कि	विनाशम्	= विनाश
येन	= जिससे	कर्तुम्	= करनेको
इदम्	= यह	कश्चित्	= कोई भी
सर्वम्	= संपूर्ण (जगत्)	न अर्हति	= समर्थ नहीं है

अंतवंतइमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥

अंतवंतः, इमे, देहाः, नित्यस्य, उक्ताः, शरीरिणः, अनाशिनः, अप्रमेयस्य, तस्मात्, युध्यस्व, भारत ॥१८॥

और इस-

अनाशिनः	=नाश रहित	अन्तवंतः	=नाशवान्
अप्रमेयस्य	=अप्रमेय	उक्ताः	=कहे गये हैं
नित्यस्य	=नित्यस्वरूप	तस्मात्	=इसलिये
शरीरिणः	=जीवात्माके	भारत	=हे भरतवंशी अर्जुन (तू)
इमे	=यह		
देहाः	=सब शरीर	युध्यस्व	=युद्ध कर

य एनं वेत्ति हंतारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हंति न हन्यते १९

यः, एनम्, वेत्ति, हंतारम्, यः, च, एनम्, मन्यते, हतम्, उभौ, तौ, न, विजानीतः, न, अयम्, हंति, न, हन्यते ॥

और-

यः	=जो	मन्यते	=मानता है।
एनम्	=इस आत्माको	तौ	=वे
हन्तारम्	=मारनेवाला	उभौ	=दोनों ही
वेत्ति	=समझता है	न	=नहीं
च	=तथा	विजानीतः	=जानते हैं (क्योंकि)
यः	=जो		
एनम्	=इसको	अयम्	=यह आत्मा
हतम्	=मरा	न	=न

हन्ति	=मारता है (और)	हन्यते	=मारा जाता है
न	=न		

न जायते म्रियते वा कदाचिन्
नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥२०॥

न, जायते, म्रियते, वा, कदाचित्, न, अयम्, भूत्वा, भविता, वा, न, भूयः, अजः, नित्यः, शाश्वतः, अयम्, पुराणः, न, हन्यते, हन्यमाने, शरीरे ॥

अयम्	=यह आत्मा	भविता	=होनेवाला है
कदाचित्	=किसीकालमेंभी		(क्योंकि)
न	=न	अयम्	=यह
जायते	=जन्मता है	अजः	=अजन्मा
वा	=और	नित्यः	=नित्य
न	=न	शाश्वतः	=शाश्वत (और)
म्रियते	=मरता है	पुराणः	=पुरातन है
वा	=अथवा	शरीरे	=शरीरके
न	=न	हन्यमाने	=नाश होनेपर भी (यह)
(अयम्)	=यह आत्मा		
भूत्वा	=होकरके	न हन्यते	=नाश नहीं होता है
भूयः	=फिर		

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हंति कम्॥२१

वेद, अविनाशिनम्, नित्यम्, यः, एनम् अजम्, अव्ययम्, कथम्, सः, पुरुषः, पार्थ, कम्, घातयति, हंति, कम् ॥

पार्थ	=हे पृथापुत्रअर्जुन	सः	=वह
यः	=जो पुरुष	पुरुषः	=पुरुष
एनम्	=इस आत्माको	कथम्	=कैसे
अविनाशिनम्	=नाश रहित	कम्	=किसको
		घातयति	=मरवाता है (और)
नित्यम्	=नित्य		
अजम्	=अजन्मा (और)	(कथम्)	=कैसे
अव्ययम्	=अव्यय	कम्	=किसको
वेद	=जानता है	हन्ति	=मारता है

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्य-
न्यानि संयाति नवानि देही ॥२२॥

वासांसि, जीर्णानि, यथा, विहाय, नवानि, गृह्णाति, नरः, अपराणि, तथा, शरीराणि, विहाय, जीर्णानि, अन्यानि, संयाति, नवानि, देही ॥

और यदि तूं कहे कि मैं तो शरीरोंके वियोगका शोक करता हूं तो यह भी उचित नहीं है, क्योंकि—

यथा	=जैसे	तथा	=वैसे (ही)
नरः	=मनुष्य	देही	=जीवात्मा
जीर्णानि	=पुराने	जीर्णानि	=पुराने
वासांसि	=वस्त्रोंको	शरीराणि	=शरीरोंको
विहाय	=त्यागकर	विहाय	=त्यागकर
अपराणि	=दूसरे	अन्यानि	=दूसरे
नवानि	=नये वस्त्रोंको	नवानि	=नये शरीरोंको
गृह्णाति	=ग्रहण करता है	संयाति	=प्राप्त होता है

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥२३

न, एनम्, छिंदंति, शस्त्राणि, न, एनम्, दहति, पावकः, न, च, एनम्, क्लेदयंति, आपः, न, शोषयति, मारुतः ॥

और हे अर्जुन—

एनम्	=इस आत्माको	न	=नहीं
शस्त्राणि	=शस्त्रादि	दहति	=जला सकतीहै
न	=नहीं		(तथा)
छिन्दन्ति	=काट सकते हैं	एनम्	=इसको
एनम्	=(और) इसको	आपः	=जल
पावकः	=आग	न	=नहीं

क्लेदयंति	= गीला कर सकते हैं	मारुतः	= वायु
च	= और	न	= नहीं
		शोषयति	= सुखा सकता है

अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४

अच्छेद्यः, अयम्, अदाह्यः, अयम्, अक्लेद्यः, अशोष्यः, एव, च, नित्यः, सर्वगतः, स्थाणुः, अचलः, अयम्, सनातनः ॥

क्योंकि-

अयम्	= यह आत्मा	अयम्	= यह आत्मा
अच्छेद्यः	= अच्छेद्य है	एव	= निस्सन्देह
अयम्	= यह आत्मा	नित्यः	= नित्य
अदाह्यः	= अदाह्य	सर्वगतः	= सर्वव्यापक
अक्लेद्यः	= अक्लेद्य	अचलः	= अचल
च	= और	स्थाणुः	= स्थिर रहने वाला (और)
अशोष्यः	= अशोष्य है (तथा)	सनातनः	= सनातन है ।

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ।२५।

अव्यक्तः, अयम्, अचिंत्यः, अयम्, अविकार्यः, अयम्, उच्यते, तस्मात्, एवम्, विदित्वा, एनम्, न, अनुशोचितुम्, अर्हसि ॥

और–

अयम्	= यह आत्मा	उच्यते	= कहा गया है
अव्यक्तः	= अव्यक्त अर्थात् इन्द्रियों का अविषय	तस्मात्	= इससे (हे अर्जुन)
	(और)	एनम्	= इस आत्माको
अयम्	= यह आत्मा	एवम्	= ऐसा
अचिन्त्यः	= अचिंत्य अर्थात् मनका अविषय	विदित्वा	= जानकर
	(और)	(त्वम्)	= तूं
अयम्	= यह आत्मा	अनुशोचितुम्	= शोककरनेको
अविकार्यः	= विकार रहित अर्थात् न बदलनेवाला	न अर्हसि	= योग्य नहीं है ॥ अर्थात् तुझे शोक करनाउचित् नहीं है ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६

अथ, च, एनम्, नित्यजातम्, नित्यम्, वा, मन्यसे, मृतम्, तथापि, त्वम्, महाबाहो, न, एवम्, शोचितुम्, अर्हसि ॥

अथ च	= और यदि	नित्यजातम्	= सदा जन्मने
त्वम्	= तूं		
एनम्	= इसको	वा	= और

नित्यम्	=सदा	महाबाहो	=हे अर्जुन
मृतम्	=मरनेवाला	एवम्	=इसप्रकार
मन्यसे	=माने	शोचितुम्	=शोक करनेको
तथापि	=तो भी	न अर्हसि	=योग्य नहीं है

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितु मर्हसि ॥२७

जातस्य, हि, ध्रुवः, मृत्युः, ध्रुवम्, जन्म, मृतस्य, च, तस्मात्, अपरिहार्ये, अर्थे, न, त्वम्, शोचितुम्, अर्हसि ॥

हि	=क्योंकि (ऐसा होनेसे तो)	जन्म	=जन्म (होना सिद्ध हुआ)
जातस्य	=जन्मनेवालेकी	तस्मात्	=इससे (भी)
ध्रुवः	=निश्चित	त्वम्	=तूं
मृत्युः	=मृत्यु	अपरिहार्ये	=(इस) विना उपायवाले
च	=और	अर्थे	=विषयमें
मृतस्य	=मरनेवालेका	शोचितुम्	=शोक करनेको
ध्रुवम्	=निश्चित	न अर्हसि	=योग्य नहीं है

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत
अव्यक्तनिधनान्येव तत्रका परिदेवना ॥२८

अव्यक्तादीनि, भूतानि, व्यक्तमध्यानि, भारत, अव्यक्तनिधनानि, एव, तत्र, का, परिदेवना ॥

और यह भीष्मादिकोंके शरीर मायामय होनेसे अनित्य हैं इससे शरीरोंके लिये भी शोक करना उचित नहीं क्योंकि—

भारत	=हे अर्जुन
भूतानि	=संपूर्ण प्राणी
अव्यक्तादीनि	=जन्मसे पहिले विना शरीरवाले
	(और)
अव्यक्तनिधनानि एव	=मरनेके बाद भी विना शरीर वाले ही हैं

	(केवल)
व्यक्तमध्यानि	=बीचमें ही शरीर वाले (प्रतीत होते) हैं
	(फिर)
तत्र	=उस विषयमें
का	=क्या
परिदेवना	=चिन्ता है ॥

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२९॥

आश्चर्यवत्, पश्यति, कश्चित्, एनम्, आश्चर्यवत्, वदति, तथा, एव, च, अन्यः, आश्चर्यवत्, च, एनम्, अन्यः, शृणोति, श्रुत्वा, अपि, एनम्, वेद, न, च, एव, कश्चित् ॥

और हे अर्जुन ! यह आत्मतत्त्व बड़ा गहन है इसलिये–

शब्द	अर्थ
कश्चित्	=कोई (महापुरुष) ही
एनम्	=इस आत्माको
आश्चर्यवत्	=आश्चर्यकी ज्यों
पश्यति	=देखता है
च	=और
तथा	=वैसे
एव	=ही
अन्यः	=दूसरा कोई (महापुरुष)ही
आश्चर्यवत्	=आश्चर्यकी ज्यों
वदति	=(इसके तत्त्व को) कहताहै

शब्द	अर्थ
च	=और
अन्यः	=दूसरा(कोई ही)
एनम्	=इस आत्माको
आश्चर्यवत्	=आश्चर्यकी ज्यों
शृणोति	=सुनता है
च	=और
कश्चित्	=कोई कोई
श्रुत्वा	=सुनकर
अपि	=भी
एनम्	=इस आत्माको
न एव	=नहीं
वेद	=जानता ॥

देही नित्यमवध्योयं देहे सर्वस्य भारत। तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि

देही, नित्यम् , अवध्यः, अयम् , देहे, सर्वस्य, भारत, तस्मात् ,सर्वाणि,भूतानि,न,त्वम् ,शोचितुम् , अर्हसि ॥३०

शब्द	अर्थ
भारत	=हे अर्जुन
अयम्	=यह

शब्द	अर्थ
देही	=आत्मा
सर्वस्य	=सबके

देहे = शरीरमें
नित्यम् = सदा ही
अवध्यः = अवध्य[1] है
तस्मात् = इसलिए
सर्वाणि = संपूर्ण
भूतानि = भूत प्राणियों के लिये
त्वम् = तूं
शोचितुम् = शोक करनेको
न अर्हसि = योग्य नहीं है

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते

स्वधर्मम्, अपि, च, अवेक्ष्य, न, विकंपितुम्, अर्हसि, धर्म्यात्, हि, युद्धात्, श्रेयः, अन्यत्, क्षत्रियस्य, न, विद्यते ॥३१॥

च = और
स्वधर्मम् = अपने धर्मको
अवेक्ष्य = देखकर
अपि = भी (तूं)
विकंपितुम् = भयकरनेको
न अर्हसि = योग्य नहीं है
हि = क्योंकि
धर्म्यात् = धर्मयुक्त
युद्धात् = युद्धसे बढ़कर
अन्यत् = दूसरा (कोई)
श्रेयः = कल्याण कारक कर्तव्य
क्षत्रियस्य = क्षत्रियके लिये
न = नहीं
विद्यते = है ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ३२

(१) जिसका वध नहीं किया जा सके।

यदृच्छया, च, उपपन्नम्, स्वर्गद्वारम्, अपावृतम्, सुखिनः, क्षत्रियाः, पार्थ, लभंते, युद्धम्, ईदृशम् ॥

और-

पार्थ	=हे पार्थ	ईदृशम्	=इस प्रकारके
यदृच्छया	=अपने आप	युद्धम्	=युद्धको
उपपन्नम्	=प्राप्त हुये	सुखिनः	=भाग्यवान्
च	=और	क्षत्रियाः	=क्षत्रिय लोग (ही)
अपावृतम्	=खुले हुये		
स्वर्गद्वारम्	=स्वर्गकेद्वाररूप	लभंते	=पाते हैं ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ।

अथ, चेत्, त्वम्, इमम्, धर्म्यम्, संग्रामम्, न, करिष्यसि, ततः, स्वधर्मम्, कीर्तिम्, च, हित्वा, पापम्, अवाप्स्यसि ॥३३॥

अथ	=और	ततः	=तो
चेत्	=यदि	स्वधर्मम्	=स्वधर्मको
त्वम्	=तूं	च	=और
इमम्	=इस	कीर्तिम्	=कीर्तिको
धर्म्यम्	=धर्मयुक्त	हित्वा	=खोकर
संग्रामम्	=संग्रामको	पापम्	=पापको
न	=नहीं	अवाप्स्यसि	=प्राप्त होगा ॥
करिष्यसि	=करेगा ।		

अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययां
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते॥३४

अकीर्तिं, च, अपि, भूतानि, कथयिष्यंति, ते, अव्ययाम्, संभावितस्य, च, अकीर्तिः, मरणात्, अतिरिच्यते ॥

च	=और	च	=और (वह)
भूतानि	=सबलोग	अकीर्तिः	=अपकीर्त्ति
ते	=तेरी	संभावितस्य	=माननीय पुरुषके लिये
अव्ययाम्	=बहुतकालतक रहनेवाली	मरणात्	=मरणसे (भी)
अकीर्तिम्	=अपकीर्त्तिको	अतिरिच्यते	=अधिक(बुरी) होती है ॥
अपि	=भी		
कथयिष्यंति	=कथन करेंगे।		

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसिलाघवम्

भयात्, रणात्, उपरतम्, मंस्यंते, त्वाम्, महारथाः, येषाम्,च, त्वम्, बहुमतः,भूत्वा,यास्यसि,लाघवम् ॥३५॥

च	=और	बहुमतः	=बहुतमाननीय
येषाम्	=जिनके	भूत्वा	=होकर
त्वम्	=तूं		(भी अब)

लाघवम्	=तुच्छताको	भयात्	=भयके कारण
यास्यसि	=प्राप्त होगा (वे)	रणात्	=युद्धसे
महारथाः	=महारथी लोग	उपरतम्	=उपराम हुआ
त्वाम्	=तुझे	मंस्यंते	=मानेंगे ॥

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः ।
निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किम् ३६

अवाच्यवादान्, च, बहून्, वदिष्यंति, तव, अहिताः, निंदंतः, तव, सामर्थ्यम्, ततः, दुःखतरं, नु, किम् ॥

च	=और	अवाच्य-वादान्	=न कहने योग्य बचनोंको
तव	=तेरे	वदिष्यंति	=कहेंगे
अहिताः	=वैरी लोग	नु	=फिर
तव	=तेरी	ततः	=उससे
सामर्थ्यम्	=सामर्थ्यकी	दुःखतरम	=अधिक दुःख
निंदंतः	=निन्दा करतेहुये	किम्	=क्या होगा ।
बहून्	=बहुतसे		

हतो वा प्राप्स्यसिस्वर्गं जित्वावाभोक्ष्यसेमहीं
तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः।३७

हतः, वा, प्राप्स्यसि, स्वर्गं, जित्वा, वा, भोक्ष्यसे, महीम्, तस्मात्, उत्तिष्ठ, कौंतेय, युद्धाय, कृतनिश्चयः ॥

इससे युद्ध करना तेरे लिये सब प्रकारसे अच्छा है क्योंकि–

वा	=या (तो)	हतः	=मरकर

स्वर्गम्	=स्वर्गको	तस्मात्	=इससे
प्राप्स्यसि	=प्राप्त होगा	कौन्तेय	=हे अर्जुन
वा	=अथवा	युद्धाय	=युद्धके लिये
जित्वा	=जीतकर	कृतनिश्चयः	=निश्चयवाला होकर
महीम्	=पृथिवीको		
भोक्ष्यसे	=भोगेगा	उत्तिष्ठ	=खड़ा हो ॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८

सुखदुःखे, समे, कृत्वा, लाभालाभौ, जयाजयौ, ततः, युद्धाय, युज्यस्व, न, एवम्, पापम्, अवाप्स्यसि ॥

यदि तुझे स्वर्ग तथा राज्यकी इच्छा न हो तो भी—

सुखदुःखे	=सुख दुःख	युज्यस्व	=तैयार हो
लाभालाभौ	=लाभ हानि (और)	एवम्	=इस प्रकार (युद्धकरनेसे) (तूं)
जयाजयौ	=जयपराजयको		
समे	=समान	पापम्	= पापको
कृत्वा	=समझकर	न	=नहीं
ततः	=उसकेउपरान्त	अवाप्स्यसि	=प्राप्त होगा ॥
युद्धाय	=युद्धके लिये		

एषा तेभिहिता सांख्ये बुद्धियोंगे त्विमां शृणु
बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यासि ३९

एषा, ते, अभिहिता, सांख्ये, बुद्धिः, योगे, तु, इमाम्, शृणु, बुद्ध्या, युक्तः, यया, पार्थ, कर्मबंधम्, प्रहास्यसि ॥

पार्थ	=हे पार्थ
एषा	=यह
बुद्धिः	=बुद्धि
ते	=तेरेलिये
सांख्ये	=ज्ञान योग[1] विषयमें
अभिहिता	=कही गयी
तु	=और
इमाम्	=इसीको (अब)
योगे	=निष्काम[2]कर्म योगविषयमें
शृणु	=सुन (कि)
यया	=जिस
बुद्ध्या	=बुद्धिसे
युक्तः	=युक्त हुआ
कर्मबंधम्	=(तूं) कर्मों के बंधनको
प्रहास्यसि	=अच्छी तरहसे नाश करेगा ॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्

न, इह, अभिक्रमनाशः, अस्ति, प्रत्यवायः, न, विद्यते. स्वल्पम्, अपि, अस्य, धर्मस्य, त्रायते, महतः, भयात् ॥४०॥

और-

इह	=इस निष्काम कर्मयोगमें
अभिक्रमनाशः	=आरम्भका अर्थात् बीजका नाश

१—२ अध्याय ३ श्लोक ३ की टिप्पणीमें इसका विस्तार देखना चाहिये।

न	=नहीं	धर्मस्य	=धर्मका
अस्ति	=है (और)	स्वल्पम्	=थोड़ा
प्रत्यवायः	=उलटा फल रूपदोष (भी)	अपि	=भी (साधन)
न	=नहीं	महतः	=जन्म मृत्यु रूप महान्
विद्यते	=होता है (इसलिये)	भयात्	=भयसे
अस्य	=इस (निष्काम कर्मयोगरूप)	त्रायते	=उद्धार कर देता है ॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ।
बहुशाखा ह्यनंताश्च बुद्धयो व्यवसायिनाम् ॥

व्यवसायात्मिका, बुद्धिः, एका, इह, कुरुनंदन, बहुशाखाः, हि, अनंताः, च, बुद्धयः, अव्यवसायिनाम् ॥४१॥

और–

कुरुनंदन	=हे अर्जुन	अव्यवसायिनाम्	=अज्ञानी (सकामी) पुरुषोंकी
इह	=इस (कल्याण मार्ग)में		
व्यवसायात्मिका	=निश्चयात्मक	बुद्धयः	= बुद्धियां
बुद्धिः	=बुद्धि	बहुशाखाः	=बहुत भेदों वाली
एका हि	=एक ही है	अनन्ताः	=अनन्त होतीहैं
च	=और		

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३

याम्, इमाम्, पुष्पिताम्, वाचम्, प्रवदंति, अविपश्चितः, वेद्वाद्रताः, पार्थ, न, अन्यत्, अस्ति, इति, वादिनः, कामात्मानः, स्वर्गपराः, जन्मकर्मफलप्रदाम्, क्रियाविशेष-बहुलाम्, भोगैश्वर्यगतिंप्रति ॥

और—

पार्थ	= हे अर्जुन	इति	= ऐसे
कामा-त्मानः	= (जो) सकामी पुरुष	वादिनः	= कहनेवाले हैं
वेद्वा-द्रताः	= केवल फल श्रुतिमें प्रीति रखनेवाले	अविप-श्चितः	= (वे) अवि-वेकी जन
स्वर्गपराः	= स्वर्गको ही परम श्रेष्ठ माननेवाले	जन्मकर्म-फलप्रदाम्	= जन्मरूप कर्म फलको देने वाली (और)
अन्यत्	= (इससेबढ़कर) और कुछ	भोगैश्वर्य-गतिंप्रति	= भोग तथा ऐश्वर्यकी प्राप्तिके लिये
न	= नहीं	क्रियाविशे-षबहुलाम्	= बहुत सी क्रियाओंके विस्तारवाली
अस्ति	= है		

इमाम्	=इस प्रकारकी	वाचम्	=वाणीको
याम्	=जिस	प्रवदंति	=कहते हैं ॥
पुष्पिताम्	={दिखाऊ शोभायुक्त		

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते

भोगैश्वर्यप्रसक्तानाम्, तया, अपहृतचेतसाम्, व्यवसा-यात्मिका, बुद्धिः, समाधौ, न, विधीयते ॥४४॥

तया	=उस वाणीद्वारा		(उन पुरुषोंके)
अपहृत-चेतसाम्	={हरे हुए चित्तवाले (तथा)	समाधौ	=अन्तःकरणमें
		व्यवसा-यात्मिका	=निश्चयात्मक
भोगैश्वर्य-प्रसक्ता-नाम्	={भोग और ऐश्वर्यमें आसक्ति वाले	बुद्धिः	=बुद्धि
		न	=नहीं
		विधीयते	=होती है ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्

त्रैगुण्यविषयाः, वेदाः, निस्त्रैगुण्यः, भव, अर्जुन, निर्द्वंद्वः, नित्यसत्त्वस्थः, निर्योगक्षेमः, आत्मवान् ॥४५॥

और—

अर्जुन	=हे अर्जुन	वेदाः	=सब वेद

त्रैगुण्य-विषयाः	=	तीनगुणोंके कार्यरूप संसारको विषयकरनेवाले अर्थात् प्रकाश करनेवाले हैं	निर्द्वंद्वः	=	सुख दुःखादि द्वंद्वोंसे रहित
			नित्यसत्त्वस्थः	=	नित्य वस्तु में स्थित (तथा)
		(इसलिये तूं)	निर्योगक्षेमः	=	योग[1]क्षेम[2]को नचाहनेवाला (और)
निस्त्रैगुण्यः	=	असंसारी अर्थात् निष्कामी (और)	आत्मवान्	=	आत्मपरायण
			भव	=	हो ॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥४६

यावान्, अर्थः, उदपाने, सर्वतः, संप्लुतोदके, तावान्, सर्वेषु, वेदेषु, ब्राह्मणस्य, विजानतः ॥

क्योंकि–

		(मनुष्यका)	यावान्	=	जितना
सर्वतः	=	सब ओरसे	अर्थः	=	प्रयोजन
संप्लुतोदके	=	परिपूर्ण जलाशयके	(अस्ति)	=	रहता है
(प्राप्तेसति)	=	प्राप्त होनेपर	विजानतः	=	अच्छी प्रकार ब्रह्मको जाननेवाले
उदपाने	=	छोटेजलाशयमें			

१—अप्राप्तकी प्राप्तिका नाम योग है ।

२—प्राप्त वस्तुकी रक्षाका नाम क्षेम है ।

ब्राह्मणस्य	=ब्राह्मणका (भी)	वेदेषु	=वेदोंमें
सर्वेषु	=सब	तावान्	=उतना ही प्रयोजन रहता है

अर्थात् जैसे बड़े जलाशयके प्राप्त हो जानेपर जलके लिये छोटे जलाशयोंकी आवश्यकता नहीं रहती वैसे ही ब्रह्मानन्दकी प्राप्ति होनेपर आनन्दके लिये वेदोंकी आवश्यकता नहीं रहती।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ४७

कर्मणि, एव, अधिकारः, ते, मा, फलेषु, कदाचन, मा, कर्मफलहेतुः, भूः, मा, ते, संगः, अस्तु, अकर्मणि॥

इससे—

ते	=तेरा	कर्मफलहेतुः	=कर्मोंके फलकी वासना वाला (भी)
कर्मणि	=कर्म करने मात्रमें	मा	=मत
एव	=ही	भूः	=हो (तथा)
अधिकारः	=अधिकार होवे	ते	=तेरी
फलेषु	=फलमें	अकर्मणि	=कर्म न करनेमें
कदाचन	=कभी	संगः	=(भी) प्रीति
मा	=नहीं (और तूं)	मा	=न
		अस्तु	=होवे॥

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय
सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोग उच्यते

योगस्थः, कुरु, कर्माणि, संगं, त्यक्त्वा, धनंजय, सिद्ध्यसिद्ध्योः,समः,भूत्वा, समत्वं,योगः,उच्यते ॥४८॥

धनंजय	=हे धनंजय	भूत्वा	=होकर
संगम्	=आसक्तिको	योगस्थः	=योगमें स्थित हुआ
त्यक्त्वा	=त्यागकर (तथा)	कर्माणि	= कर्मों को
सिद्ध्य-सिद्ध्योः	=सिद्धि और असिद्धिमें	कुरु	=कर (यह)
		समत्वम्	=समत्व[1]भावही
समः	=समान बुद्धिवाला	योगः	=योग (नामसे)
		उच्यते	=कहा जाताहै

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ।४९

दूरेण, हि, अवरम्, कर्म, बुद्धियोगात्, धनंजय, बुद्धौ, शरणम्, अन्विच्छ, कृपणाः, फलहेतवः ॥

इस समत्वरूप—

बुद्धियो-गात्	=बुद्धियोगसे	कर्म	=(सकाम) कर्म
		दूरेण	=अत्यन्त

१—जो कुछ भी कर्म किया जाय उसके पूर्ण होने और न होनेमें तथा उसके फलमें समभाव रहनेका नाम 'समत्व' है ।

अवरम् =तुच्छ है
(अतः) =इसलिये
धनंजय =हे धनंजय
बुद्धौ =समत्व बुद्धियोगका
शरणम् =आश्रय
अन्विच्छ=ग्रहण कर
हि =क्योंकि
फलहेतवः =फलकी वासनावाले
कृपणाः =अत्यन्तदीन हैं

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगःकर्मसु कौशलम्

बुद्धियुक्तः, जहाति, इह, उभे, सुकृतदुष्कृते, तस्मात्, योगाय, युज्यस्व, योगः, कर्मसु, कौशलम् ॥ ५० ॥

और–

बुद्धियुक्तः=समत्व बुद्धियुक्त पुरुष
सुकृत-दुष्कृते =पुण्य पाप
उभे =दोनोंको
इह =इस लोकमें
(एव) =ही
जहाति =त्याग देताहै अर्थात् उनसे लिपायमान नहीं होता
तस्मात् =इससे
योगाय =समत्वबुद्धियोगकेलियेही
युज्यस्व =चेष्टा कर
(यह)
योगः =समत्व बुद्धि रूप योग ही
कर्मसु = कर्मोंमें
कौशलम्=चतुरता है अर्थात् कर्म बन्धनसे छूटनेका उपायहै

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबंधविनिर्मुक्ताःपदंगच्छंत्यनामयम् ५१

कर्मजम्, बुद्धियुक्ताः, हि, फलम्, त्यक्त्वा, मनीषिणः,
जन्मबन्धविनिर्मुक्ताः, पदम्, गच्छन्ति, अनामयम् ॥

हि	=क्योंकि	जन्मबन्धविनिर्मुक्ताः	=जन्मरूप बन्धनसे छूटे हुए
बुद्धियुक्ताः	=बुद्धियोगयुक्त		
मनीषिणः	=ज्ञानीजन		
कर्मजम्	=कर्मों सेउत्पन्न होनेवाले	अनामयम्	=निर्दोष अर्थात् अमृतमय
फलम्	=फलको	पदम्	=परमपदको
त्यक्त्वा	=त्यागकर।	गच्छन्ति	=प्राप्त होतेहैं ॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ५२

यदा, ते, मोहकलिलम्, बुद्धिः, व्यतितरिष्यति,
तदा, गन्तासि, निर्वेदं, श्रोतव्यस्य, श्रुतस्य, च, ॥

और हे अर्जुन—

यदा	=जिसकालमें	मोहकलिलम्	=मोहरूप दलदलको
ते	=तेरी	व्यतितरिष्यति	=बिलकुल तर जायगी।
बुद्धिः	=बुद्धि		

तदा	=तब	च	=और
(त्वम्)	=तूं	श्रुतस्य	=सुने हुएके
श्रोतव्यस्य	=सुनने योग्य	निर्वेदम्	=वैराग्यको
		गन्तासि	=प्राप्त होगा ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३

श्रुतिविप्रतिपन्ना, ते, यदा, स्थास्यति, निश्चला, समाधौ, अचला, बुद्धिः, तदा, योगम्, अवाप्स्यसि ॥

और—

यदा	=जब	अचला	=अचल और
ते	=तेरी	निश्चला	=स्थिर
श्रुतिविप्रतिपन्ना	=अनेक प्रकार के सिद्धान्तों को सुननेसे विचलित हुई	स्थास्यति	=ठहर जायगी
		तदा	=तब (तूं)
		योगम्	=समत्वरूप योगको
बुद्धिः	=बुद्धि	अवाप्स्यसि	=प्राप्त होगा ॥
समाधौ	=परमात्माके स्वरूपमें		

अर्जुन उवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्

स्थितप्रज्ञस्य, का, भाषा, समाधिस्थस्य, केशव, स्थितधीः, किम्, प्रभाषेत, किम्, आसीत, व्रजेत, किम् ॥५४॥

इस प्रकार भगवान्‌के वचनोंको सुनकर अर्जुनने पूछा–

केशव	= हे केशव	स्थितधीः	= स्थिर बुद्धि पुरुष
समाधिस्थस्य	= समाधिमें स्थित	किम्	= कैसे
स्थितप्रज्ञस्य	= स्थिर बुद्धि वाले पुरुषका	प्रभाषेत	= बोलता है
		किम्	= कैसे
का	= क्या	आसीत	= बैठता है
भाषा	= लक्षण है	किम्	= कैसे
	(और)	व्रजेत	= चलता है ॥

श्रीभगवानुवाच

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते

प्रजहाति, यदा, कामान्, सर्वान्, पार्थ, मनोगतान्, आत्मनि, एव, आत्मना, तुष्टः, स्थितप्रज्ञः, तदा, उच्यते ॥५५॥

उसके उपरान्त श्रीकृष्ण महाराज बोले–

पार्थ	= हे अर्जुन	तदा	= उस कालमें
यदा	= जिसकालमें	आत्मना	= आत्मासे
	(यह पुरुष)	एव	= ही
मनोगतान्	= मनमें स्थित	आत्मनि	= आत्मामें
सर्वान्	= संपूर्ण	तुष्टः	= संतुष्ट हुआ
कामान्	= कामनाओंको	स्थितप्रज्ञः	= स्थिरबुद्धिवाला
प्रजहाति	= त्याग देताहै	उच्यते	= कहाजाताहै ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

दुःखेषु, अनुद्विग्नमनाः, सुखेषु, विगतस्पृहः, वीतराग-भयक्रोधः, स्थितधीः, मुनिः, उच्यते ॥

तथा—

दुःखेषु	=दुःखों(कीप्राप्ति)में	वीतराग-भयक्रोधः	=नष्ट हो गये हैं राग भय और क्रोध जिसके (ऐसा)
अनुद्विग्नमनाः	=उद्वेग रहित है मन जिसका	मुनिः	=मुनि
सुखेषु	=(और) सुखों (की प्राप्ति)में	स्थितधीः	=स्थिर बुद्धि
विगत-स्पृहः	=दूर हो गई है स्पृहा जिसकी (तथा)	उच्यते	=कहा जाताहै ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनंदति न द्वेष्टि तस्य प्रज्ञाप्रतिष्ठिता ५७

यः, सर्वत्र, अनभिस्नेहः, तत्, तत्, प्राप्य, शुभाशुभं, न, अभिनन्दति, न, द्वेष्टि, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

और—

यः	=जो पुरुष	तत्, तत्	=उस उस
सर्वत्र	=सर्वत्र	शुभाशु-भम्	=शुभ तथा अशुभ (वस्तुओं)को
अनभि-स्नेहः	=स्नेह रहित हुआ		

प्राप्य	=प्राप्त होकर	द्वेष्टि	=द्वेष करता है
न	=न	तस्य	=उसकी
अभिनन्दति	=प्रसन्न होता है (और)	प्रज्ञा	=बुद्धि
न	=न	प्रतिष्ठिता	=स्थिर है ॥

यदा संहरते चायं कूर्मोऽगानीव सर्वशः ।
इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञा प्रतिष्ठिता ५८

यदा, संहरते, च, अयम्, कूर्मः, अंगानि, इव, सर्वशः, इन्द्रियाणि, इन्द्रियार्थेभ्यः, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

च	=और	इंद्रियाणि	=इन्द्रियोंको
कूर्मः	=कछुआ अपने	इन्द्रियार्थेभ्यः	=इंन्द्रियोंके विषयोंसे
अंगानि	=अंगोंको		
इव	=जैसे (समेट लेता है वैसे ही)	संहरते	=समेट लेता है (तब)
अयम्	=यह पुरुष	तस्य	=उसकी
यदा	=जब	प्रज्ञा	=बुद्धि
सर्वशः	=सब ओरसे (अपनी)	प्रतिष्ठिता	=स्थिरहोतीहै ॥

विषया विनिवर्तंते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।५९।

विषयाः, विनिवर्तन्ते, निराहारस्य, देहिनः, रसवर्जम्, रसः, अपि, अस्य, परम्, दृष्ट्वा, निवर्तते ॥

यद्यपि-

(इन्द्रियोंकेद्वारा)	रसवर्जम् = राग नहीं (निवृत्त होता) (और)
निराहारस्य = विषयोंको न ग्रहण करनेवाले	अस्य = इस पुरुषका
देहिनः = पुरुषके (भी) (केवल)	रसः = (तो) राग
विषयाः = विषय (तो)	अपि = भी
विनिवर्तंते = निवृत्त हो जाते हैं (परन्तु)	परम् = परमात्माको
	दृष्ट्वा = साक्षात् करके
	निवर्तते = निवृत्त हो जाता है ॥

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ।
इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः॥६०॥

यततः, हि, अपि, कौन्तेय, पुरुषस्य, विपश्चितः, इन्द्रियाणि, प्रमाथीनि, हरन्ति, प्रसभं, मनः ॥

और-

कौन्तेय = हे अर्जुन	पुरुषस्य = पुरुषके
हि = जिससे कि	अपि = भी
यततः = यत्न करते हुए	मनः = मनको
विपश्चितः = बुद्धिमान्	

प्रमाथीनि	= यह प्रमथन स्वभाववाली	प्रसभम्	= बलात्कारसे
इन्द्रियाणि	= इन्द्रियां	हरन्ति	= हर लेती हैं ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येंद्रियाणि तस्य प्रज्ञाप्रतिष्ठिता६१

तानि, सर्वाणि, संयम्य, युक्तः, आसीत, मत्परः, वशे, हि, यस्य, इन्द्रियाणि, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

इसलिये मनुष्यको चाहिये कि-

तानि	= उन	हि	= क्योंकि
सर्वाणि	= संपूर्ण इंद्रियोंको	यस्य	= जिस पुरुषके
		इंद्रियाणि	= इन्द्रियां
संयम्य	= वशमें करके	वशे	= वशमें होतीहैं
युक्तः	= समाहित चित्त हुआ	तस्य	= उसकी (ही)
		प्रज्ञा	= बुद्धि
मत्परः	= मेरे परायण	प्रतिष्ठिता	= स्थिर होतीहै
आसीत	= स्थित होवे		

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामःकामात्क्रोधोऽभिजायते

ध्यायतः, विषयान्, पुंसः, संगः, तेषु, उपजायते, संगात्, संजायते, कामः, कामात्, क्रोधः, अभिजायते ॥

और हे अर्जुन मन सहित इन्द्रियोंको वशमें करके मेरे परायण न होनेसे मनके द्वारा विषयोंका चिन्तन होता है और-

विषयान् = विषयोंको
ध्यायतः = चिंतन करने वाले
पुंसः = पुरुषकी
तेषु = उन विषयोंमें
संगः = आसक्ति
उपजायते = हो जाती है (और)
संगात् = आसक्तिसे
(उनविषयोंकी)
कामः = कामना
संजायते = उत्पन्न होतीहै (और)
कामात् = कामना (मेंविघ्नपड़ने)से
क्रोधः = क्रोध
अभिजायते = उत्पन्न होता है ॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति

क्रोधात्, भवति, संमोहः, संमोहात्, स्मृतिविभ्रमः,
स्मृतिभ्रंशात्, बुद्धिनाशः, बुद्धिनाशात्, प्रणश्यति ॥६३॥

और–

क्रोधात् = क्रोधसे
संमोहः = अविवेक अर्थात् मूढ़भाव
भवति = उत्पन्न होताहै (और)
संमोहात् = अविवेकसे
स्मृति-विभ्रमः = स्मरणशक्ति भ्रमित हो जाती है।
(और)
स्मृति-भ्रंशात् = स्मृतिके भ्रमितहोजानेसे
बुद्धिनाशः = बुद्धि अर्थात् ज्ञानशक्तिका नाश हो जाता है (और)

बुद्धि-नाशात्	= बुद्धिके नाश होनेसे (यह पुरुष)	प्रणश्यति =	अपने श्रेय साधनसे गिर जाता है॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति

रागद्वेषवियुक्तैः, तु, विषयान्, इन्द्रियैः, चरन्, आत्मवश्यैः, विधेयात्मा, प्रसादम्, अधिगच्छति ॥६४॥

तु	= परन्तु	विषयान्	= विषयोंको
विधेयात्मा	= स्वाधीन अन्तःकरणवाला	चरन्	= भोगता हुआ
रागद्वेष-वियुक्तैः	= (पुरुष) राग द्वेषसे रहित	प्रसादम्	= अन्तःकरण की प्रसन्नता अर्थात् स्वच्छताको
आत्म-वश्यैः	= अपने वशमें की हुई	अधिग-च्छति	= प्राप्त होता है ॥
इन्द्रियैः	= इंद्रियों द्वारा		

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥

प्रसादे, सर्वदुःखानाम्, हानिः, अस्य, उपजायते, प्रसन्नचेतसः, हि, आशु, बुद्धिः, पर्यवतिष्ठते ॥

और—

(उस)			(उस)
प्रसादे	= निर्मलताके होनेपर	प्रसन्न-चेतसः	= प्रसन्नचित्त वाले पुरुषकी
अस्य	= इसके	बुद्धिः	= बुद्धि
सर्व-दुःखानां	= सम्पूर्ण दुःखोंका	आशु	= शीघ्र
हानिः,	= अभाव	हि	= ही
उपजायते	= हो जाता है (और)	पर्यव-तिष्ठते	= अच्छी प्रकार स्थिर हो जाती है ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शांतिरशांतस्य कुतः सुखम् ॥

न, अस्ति, बुद्धिः, अयुक्तस्य, न, च, अयुक्तस्य, भावना,
न,च,अभावयतः, शान्तिः,अशान्तस्य,कुतः, सुखम् ॥६६॥

और हे अर्जुन—

अयुक्तस्य	= साधन रहित पुरुषके (अन्तःकरणमें)	भावना	= आस्तिक भाव भी
बुद्धिः	= श्रेष्ठ बुद्धि	न	= नहीं होता है (और)
न	= नहीं	अभाव-यतः	= विना आस्तिक भाववाले पुरुषको
अस्ति	= होती है		
च	= और		
अयुक्तस्य	= (उस) अयुक्तके (अंतःकरणमें)	शान्तिः	= शान्ति
		च	= भी

न	=नहीं (होती) (फिर)	सुखम्	=सुख
अशांतस्य	={शान्ति रहित पुरुषको	कुतः	=कैसे (हो सकता है)

इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥६७

इन्द्रियाणाम्, हि, चरताम्, यत्, मनः, अनु, विधीयते, तत्, अस्य, हरति, प्रज्ञाम्, वायुः, नावम्, इव, अम्भसि ॥६७॥

हि	=क्योंकि	यत्	=जिस (इंद्रियके)
अंभसि	=जलमें	अनु	=साथ
वायुः	=वायु	मनः	=मन
नावम्	=नावको	विधीयते	=रहता है
इव	=जैसे (हरलेता है वैसे ही विषयोंमें)	तत्	=वह (एकही इंद्रिय)
		अस्य	={इस (अयुक्त) पुरुषकी
चरताम्	=विचरती हुई	प्रज्ञाम्	= बुद्धिको
इन्द्रियाणाम्	={इंद्रियोंके बीचमें	हरति	={हरण कर लेती है ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

तस्मात्, यस्य, महाबाहो, निगृहीतानि, सर्वशः, इन्द्रियाणि, इंद्रियार्थेभ्यः, तस्य, प्रज्ञा, प्रतिष्ठिता ॥६८॥

तस्मात्	=इससे	निगृहीतानि	=वशमें की हुई होती हैं
महाबाहो	=हे महाबाहो	तस्य	=उसकी
यस्य	=जिस पुरुषकी	प्रज्ञा	=बुद्धि
इंद्रियाणि	=इंद्रियां	प्रतिष्ठिता	=स्थिर होती है ॥
सर्वशः	=सब प्रकार		
इंद्रियार्थेभ्यः	=इन्द्रियोंके विषयोंसे		

या निशा सर्वभूतानां तस्यां जागर्ति संयमी
यस्यां जाग्रति भूतानि सा निशा पश्यतोमुनेः

या, निशा, सर्वभूतानाम्, तस्याम्, जागर्ति, संयमी, यस्याम्, जाग्रति, भूतानि, सा, निशा, पश्यतः, मुनेः ॥६९॥

और हे अर्जुन-

सर्वभूतानाम्	=संपूर्ण भूत प्राणियोंके लिये	संयमी	=(भगवत्को प्राप्त हुआ) योगी पुरुष
या	= जो	जागर्ति	=जागता है (और)
निशा	= रात्रि है	यस्याम्	=जिस नाशवान् क्षणभंगुर सांसारिक सुखमें
तस्याम्	=उस नित्य शुद्ध बोध स्वरूप परमानन्दमें		

भूतानि	=सब भूतप्राणी	मुनेः	=मुनिके लिये
जाग्रति	=जागते हैं	सा	=वह
पश्यतः	=तत्त्वको जाननेवाले	निशा	=रात्रि है ॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशंति यद्वत् ।
तद्वत्कामा यं प्रविशंति सर्वे
स शांतिमाप्नोति न कामकामी ॥७०॥

आपूर्यमाणम्, अचलप्रतिष्ठम्, समुद्रम्, आपः, प्रविशन्ति, यद्वत्, तद्वत्, कामाः, यम्, प्रविशन्ति, सर्वे, सः, शांतिम्, आप्नोति, न, कामकामी ॥

और–

यद्वत्	=जैसे	प्रविशंति	=समा जाते हैं
आपूर्यमाणम्	=सब ओरसे परिपूर्ण	तद्वत्	=वैसे ही
अचलप्रतिष्ठम्	=अचल प्रतिष्ठावाले	यम्	=जिस (स्थिर बुद्धि)पुरुषके प्रति
समुद्रम्	=समुद्रके प्रति	सर्वे	=संपूर्ण
आपः	=नाना नदियोंके जल (उसकोचलायमान न करतेहुएही)	कामाः	=भोग (किसी प्रकारका विकार उत्पन्न किये विना ही)

प्रविशंति	=समा जाते हैं	न	= न कि
सः	=वह(पुरुष)	कामकामी	= भोगोंको चाहनेवाला ॥
शान्तिम्	=परमशान्तिको		
आप्नोति	=प्राप्त होता है		

विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः
निर्ममो निरहंकारः स शांतिमधिगच्छति ७१

विहाय, कामान्, यः, सर्वान्, पुमान्, चरति, निःस्पृहः, निर्ममः, निरहंकारः, सः, शान्तिम्, अधिगच्छति ॥

क्योंकि–

यः	=जो	निःस्पृहः	= स्पृहा रहित हुआ
पुमान्	=पुरुष	चरति	= वर्तता है
सर्वान्	=संपूर्ण	सः	=वह
कामान्	=कामनाओंको	शान्तिम्	=शान्तिको
विहाय	=त्यागकर	अधिगच्छति	=प्राप्त होताहै ॥
निर्ममः	=ममता रहित (और)		
निरहंकारः	=अहंकार रहित		

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति
स्थित्वास्यामंतकालेपि ब्रह्म निर्वाणमृच्छति

एषा, ब्राह्मी, स्थितिः, पार्थ, न, एनाम्, प्राप्य, विमुह्यति, स्थित्वा, अस्याम्, अंतकाले, अपि, ब्रह्मनिर्वाणम्, ऋच्छति ॥७२॥

पार्थ	=हे अर्जुन		(और)
एषा	=यह	अन्तकाले	=अन्तकालमें
ब्राह्मी	=ब्रह्मको प्राप्त हुए पुरुषकी	अपि	=भी
		अस्याम्	=इस निष्ठामें
स्थितिः	=स्थिति है	स्थित्वा	=स्थित होकर
एनाम्	=इसको	ब्रह्मनिर्वाणम्	=ब्रह्मानन्दको
प्राप्य	=प्राप्त होकर		
न विमुह्यति	=मोहित नहीं होता है	ऋच्छति	=प्राप्त हो जाता है॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्या-याम् योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्य योगोनाम द्वितीयोऽध्यायः ॥२॥

इति श्रीमद्भगवद्‌गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्र विषयक श्रीकृष्ण और अर्जुनके संवादमें "सांख्ययोग" नामक दूसरा अध्याय।

हरि ॐ तत्सत् हरि ॐ तत्सत् हरि ॐ तत्सत्

ॐ

श्रीपरमात्मनेनमः

अथ तृतीयोऽध्यायः ॥

अर्जुन उवाच ।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्माणि घोरे मां नियोजयसि केशव ।१

ज्यायसी, चेत्, कर्मणः, ते, मता, बुद्धिः, जनार्दन,
तत्, किम्, कर्मणि, घोरे, माम्, नियोजयसि, केशव ॥

इसपर अर्जुनने प्रश्न किया कि–

जनार्दन = हे जनार्दन
चेत् = यदि
कर्मणः = कर्मोंकी अपेक्षा
बुद्धिः = ज्ञान
ते = आपके
ज्यायसी = श्रेष्ठ
मता = मान्य है
तत् = तो फिर
केशव = हे केशव
माम् = मुझे
घोरे = भयंकर
कर्मणि = कर्ममें
किम् = क्यों
नियोजयसि = लगाते हैं ॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ।२

व्यामिश्रेण, इव, वाक्येन, बुद्धिम्, मोहयसि, इव, मे,
तत्, एकम्, वद, निश्चित्य, येन, श्रेयः, अहम्, आप्नुयाम्

तथा आप-

व्यामिश्रेण	=मिले हुए	एकम्	=एक (बात) को
इव	=से	निश्चित्य	=निश्चय करके
वाक्येन	=वचनसे	वद	=कहिए (कि)
मे	=मेरी	येन	=जिससे
बुद्धिम्	=बुद्धिको	अहम्	=मैं
मोहयसि इव	=मोहित सी करते हैं	श्रेयः	=कल्याणको
तत्	=(इसलिये)उस	आप्नुयाम्	=प्राप्त होऊं ॥

श्रीभगवानुवाच

लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्

लोके, अस्मिन्, द्विविधा, निष्ठा, पुरा, प्रोक्ता, मया, अनघ, ज्ञानयोगेन, सांख्यानाम्, कर्मयोगेन, योगिनाम् ॥३॥

इस प्रकार अर्जुनके पूछनेपर भगवान् श्रीकृष्ण महाराज बोले-

अनघ	=हे निष्पाप (अर्जुन)	निष्ठा	=निष्ठा[1]
		मया	=मेरेद्वारा
अस्मिन्	=इस	पुरा	=पहले
लोके	=लोकमें	प्रोक्ता	=कही गई है
द्विविधा	=दो प्रकारकी	सांख्यानाम्	=ज्ञानियोंकी

(१) साधनकी परिपक्व अवस्था अर्थात् पराकाष्ठाका नाम 'निष्ठा' है।

ज्ञानयोगेन[1]	= ज्ञानयोगसे (और)	कर्मयोगेन[2]	= निष्काम कर्मयोगसे
योगिनाम्	= योगियोंकी		

न कर्मणामनारंभान्नैष्कर्म्यम् पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥४

न, कर्मणाम्, अनारंभात्, नैष्कर्म्यम्, पुरुषः, अश्नुते, न, च, संन्यसनात्, एव, सिद्धिम्, समधिगच्छति ॥

परन्तु किसी भी मार्गके अनुसार कर्मोंको स्वरूपसे त्यागनेकी आवश्यकता नहीं है क्योंकि—

पुरुषः	= मनुष्य	अनारंभात्	= न करनेसे
न	= न (तो)	नैष्कर्म्यम्	= निष्कर्मता[3]को
कर्मणाम्	= कर्मोंके	अश्नुते	= प्राप्त होता है

(१) मायासे उत्पन्न हुए संपूर्ण गुण ही गुणोंमें वर्तते हैं ऐसे समझकर तथा मन इन्द्रिय और शरीर द्वारा होनेवाली संपूर्ण क्रियाओंमें कर्तापनके अभिमानसे रहित होकर सर्वव्यापी सच्चिदानन्द घन परमात्मामें एकी भावसे स्थित रहनेका नाम 'ज्ञानयोग' है इसीको—'संन्यास' 'सांख्ययोग' इत्यादि नामोंसे कहा है ।

(२) फल और आसक्तिको त्यागकर भगवत् आज्ञानुसार केवल भगवत् अर्थ समत्व बुद्धिसे कर्म करनेका नाम 'निष्काम कर्मयोग' है इसीको 'समत्वयोग' 'बुद्धियोग' 'कर्मयोग' 'तदर्थकर्म' 'मदर्थकर्म' 'मत्कर्म' इत्यादि नामोंसे कहा है ।

(३) जिस अवस्थाको प्राप्त हुए पुरुषके कर्म अकर्म हो जाते हैं अर्थात् फल उत्पन्न नहीं कर सकते उस अवस्थाका नाम 'निष्कर्मता' है

च	=और	सिद्धिम्	=भगवत् साक्षात्कार रूप सिद्धिको
न	=न		
संन्यसनात् एव	=कर्मोंको त्यागने मात्रसे	समधिगच्छति	=प्राप्त होता है

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥५॥

न, हि, कश्चित्, क्षणम्, अपि, जातु, तिष्ठति, अकर्मकृत्, कार्यते, हि, अवशः, कर्म, सर्वः, प्रकृतिजैः, गुणैः ॥

तथा सर्वथा कर्मोंका स्वरूपसे त्याग हो भी नहीं सकता—

हि	=क्योंकि	हि	=निस्संदेह
कश्चित्	=कोई भी (पुरुष)	सर्वः	=सब (ही पुरुष)
जातु	=किसी कालमें	प्रकृतिजैः	=प्रकृतिसे उत्पन्न हुए
क्षणम्	=क्षणमात्र		
अपि	=भी	गुणैः	=गुणों द्वारा
अकर्मकृत्	=बिना कर्म किये	अवशः	=परवश हुए
न	=नहीं	कर्म	=कर्म
तिष्ठति	=रहता है	कार्यते	=करते हैं ॥

कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन्
इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते

कर्मेन्द्रियाणि, संयम्य, यः, आस्ते, मनसा, स्मरन्, इंद्रियार्थान्, विमूढात्मा, मिथ्याचारः, सः, उच्यते ॥६॥

इसलिये—

यः	=जो	मनसा	=मनसे
विमूढात्मा	=मूढ़बुद्धि पुरुष	स्मरन्	=चिंतन करता
कर्मेन्द्रियाणि	=कर्मेन्द्रियों को (हठसे)	आस्ते	=रहता है
संयम्य	=रोककर	सः	=वह
इन्द्रियार्थान्	=इंद्रियोंके भोगोंको	मिथ्याचारः	=मिथ्याचारी अर्थात् दंभी
		उच्यते	=कहाजाताहै॥

यस्त्विद्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेद्रियैः कर्मयोगमसक्तः स विशिष्यते ।७।

यः, तु, इन्द्रियाणि, मनसा, नियम्य, आरभते, अर्जुन, कर्मेन्द्रियैः, कर्मयोगम्, असक्तः, सः, विशिष्यते ॥

तु	=और	कर्मेन्द्रियैः	=कर्मेन्द्रियोंसे
अर्जुन	=हे अर्जुन	कर्मयोगम्	=कर्मयोगका
यः	=जो (पुरुष)	आरभते	=आचरण करता है
मनसा	=मनसे	सः	=वह
इंद्रियाणि	=इन्द्रियोंको	विशिष्यते	=श्रेष्ठ है ॥
नियम्य	=वशमें करके		
असक्तः	=अनासक्त हुआ		

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥८॥

नियतम्, कुरु, कर्म, त्वम्, कर्म, ज्यायः, हि, अकर्मणः, शरीरयात्रा, अपि, च, ते, न, प्रसिद्ध्येत्, अकर्मणः ॥

इसलिये–

त्वम्	= तूं	कर्म	= कर्म करना
नियतम्	= शास्त्र विधि से नियत किये हुए	ज्यायः	= श्रेष्ठ है
		च	= तथा
		अकर्मणः	= कर्म नकरनेसे
कर्म	= स्वधर्म रूप कर्मको	ते	= तेरा
		शरीरयात्रा	= शरीर निर्वाह
कुरु	= कर	अपि	= भी
हि	= क्योंकि	न	= नहीं
अकर्मणः	= कर्म न करने की अपेक्षा	प्रसिद्ध्येत्	= सिद्ध होगा ॥

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः ।
तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ॥९॥

यज्ञार्थात्, कर्मणः, अन्यत्र, लोकः, अयम्, कर्मबंधनः, तदर्थम्, कर्म, कौंतेय, मुक्तसंगः, समाचर ॥

और हे अर्जुन बन्धनके भयसे भी कर्मोंका त्याग करना योग्य नहीं है क्योंकि–

यज्ञार्थात्	= यज्ञ अर्थात् विष्णुके निमित्तकियेहुए	कर्मणः	= कर्मके सिवाय
		अन्यत्र	= अन्य कर्ममें (लगाहुआ ही)

अयम्	= यह	मुक्तसंगः	= आसक्तिसे रहित हुआ
लोकः	= मनुष्य	तदर्थम्	= उस परमेश्वर के निमित्त
कर्मबंधनः	= कर्मों द्वारा बंधता है (इसलिये)	कर्म	= कर्मका
कौंतेय	= हे अर्जुन	समाचर	= भलीप्रकार आचरणकर

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

सहयज्ञाः, प्रजाः, सृष्ट्वा, पुरा, उवाच, प्रजापतिः,
अनेन, प्रसविष्यध्वम्, एषः, वः, अस्तु, इष्टकामधुक् ॥१०॥

तथा कर्म न करनेसे तूं पापको भी प्राप्त होगा क्योंकि—

प्रजापतिः	= प्रजापति (ब्रह्मा) ने	प्रसविष्यध्वम्	= वृद्धिको प्राप्त होओ (और)
पुरा	= कल्पके आदिमें	एषः	= यह यज्ञ
सहयज्ञाः	= यज्ञ सहित	वः	= तुमलोगोंको
प्रजाः	= प्रजाको	इष्टकामधुक्	= इच्छितकामनाओंके देनेवाला
सृष्ट्वा	= रचकर		
उवाच	= कहा कि		
अनेन	= इस (यज्ञ) द्वारा (तुमलोग)	अस्तु	= होवे ॥

देवान्भावयतानेन ते देवा भावयंतु वः ।
परस्परं भावयंतः श्रेयः परमवाप्स्यथ ।११।

देवान्, भावयत, अनेन, ते, देवाः, भावयंतु, वः, परस्परम्, भावयंतः, श्रेयः, परम्, अवाप्स्यथ ॥

तथा तुमलोग–

अनेन	=इस(यज्ञद्वारा)	(एवम्)	=इस प्रकार
देवान्	=देवताओंकी	परस्परं	=आपसमें (कर्त्त-व्यसमझकर)
भावयत	=उन्नति करो	भावयंतः	=उन्नतिकरतेहुए
ते	=(और) वे	परम्	=परम
देवाः	=देवता लोग	श्रेयः	=कल्याणको
वः	=तुमलोगोंकी	अवाप्स्यथ	=प्राप्त होवोगे ॥
भावयन्तु	=उन्नति करें		

इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः
तैर्दत्तानप्रदायैभ्यो यो भुंक्तेस्तेन एव सः॥१२

इष्टान्, भोगान्, हि, वः, देवाः, दास्यंते, यज्ञभाविताः, तैः, दत्तान्, अप्रदाय, एभ्यः, यः, भुंक्ते, स्तेनः, एव, सः॥

तथा–

यज्ञभाविताः	=यज्ञ द्वारा बढ़ाये हुए		(विना मांगेही)
		इष्टान्	=प्रिय
देवाः	=देवता लोग	भोगान्	=भोगोंको
वः	=तुम्हारेलिये	दास्यंते	=देंगे

तैः	=उनके द्वारा	हि	=ही
दत्तान्	=दियेहुए भोगोंको	भुंक्ते	=भोगता है
यः	=जो पुरुष	सः	=वह
एभ्यः	=इनके लिये	एव	=निश्चय
अप्रदाय	=विना दिये	स्तेनः	=चोर है ॥

यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः।
भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् १३

यज्ञशिष्टाशिनः, संतः, मुच्यंते, सर्वकिल्बिषैः, भुंजते, ते, तु, अघम्, पापाः, ये, पचंति, आत्मकारणात् ॥

कारण कि—

यज्ञशिष्टाशिनः	=यज्ञसे शेष बचेहुए अन्नको खानेवाले	पापाः	=पापीलोग
संतः	=श्रेष्ठ पुरुष	आत्मकारणात्	=अपने (शरीरपोषणके) लिये ही
सर्वकिल्बिषैः	=सब पापोंसे	पचन्ति	=पकाते हैं
मुच्यंते	=छूटते हैं (और)	ते	=वे
ये	=जो	तु	=तो
		अघम्	=पापको ही
		भुंजते	=खाते हैं

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥१४

अन्नात्, भवन्ति, भूतानि, पर्जन्यात्, अन्नसंभवः,
यज्ञात्, भवति, पर्जन्यः, यज्ञः, कर्मसमुद्भवः ॥

क्योंकि–

भूतानि	=संपूर्ण प्राणी	यज्ञात्	=यज्ञसे
अन्नात्	=अन्नसे	भवति	=होती है (और वह)
भवन्ति	=उत्पन्न होतेहैं	यज्ञः	=यज्ञ
अन्नसंभवः	=(और) अन्न की उत्पत्ति	कर्मसमुद्भवः	=कर्मों से उत्पन्न होने वाला है ॥
पर्जन्यात्	=वृष्टिसे होती है		
पर्जन्यः	=(और) वृष्टि		

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् १५

कर्म, ब्रह्मोद्भवम्, विद्धि, ब्रह्म, अक्षरसमुद्भवम्,
तस्मात्, सर्वगतम्, ब्रह्म, नित्यम्, यज्ञे, प्रतिष्ठितम्॥

तथा उस–

कर्म	=कर्मको (तूं)	तस्मात्	=इससे
ब्रह्मोद्भवं	=वेदसे उत्पन्न हुआ	सर्वगतम्	=सर्वव्यापी
विद्धि	=जान	ब्रह्म	=परम अक्षर (परमात्मा)
ब्रह्म	=(और) वेद	नित्यम्	=सदा ही
अक्षरसमुद्भवम्	=अविनाशी (परमात्मा) से उत्पन्न हुआहै	यज्ञे	=यज्ञमें
		प्रतिष्ठितम्	=प्रतिष्ठितहै॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६

एवम्, प्रवर्तितम्, चक्रम्, न, अनुवर्तयति, इह, यः, अघायुः, इन्द्रियारामः, मोघम्, पार्थ, सः, जीवति॥

पार्थ =हे पार्थ
यः =जो पुरुष
इह =इस लोकमें
एवम् =इस प्रकार
प्रवर्तितम् =चलाये हुये
चक्रम् =सृष्टिचक्रके
न अनुवर्तयति =अनुसार नहीं वर्तता है (अर्थात् शास्त्र अनुसार कर्मोंको नहीं करता है)
सः =वह
इन्द्रियारामः =इंद्रियोंके सुखको भोगनेवाला
अघायुः =पाप आयु
मोघम् =(पुरुष) व्यर्थही
जीवति =जीता है॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७

यः, तु, आत्मरतिः, एव, स्यात्, आत्मतृप्तः, च, मानवः, आत्मनि, एव, च, संतुष्टः, तस्य, कार्यम्, न, विद्यते॥

तु =परन्तु
यः =जो

मानवः	=मनुष्य	एव	=ही
आत्मरतिः एव	= { आत्मा ही में प्रीतिवाला	संतुष्टः	=संतुष्ट
		स्यात्	=होवे
च	=और	तस्य	=उसके लिये
आत्मतृप्तः	=आत्माहीमेंतृप्त	कार्यम्	=कोई कर्तव्य
च	=तथा	न	=नहीं
आत्मनि	=आत्मामें	विद्यते	=है ॥

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ।१८।

न, एव, तस्य, कृतेन, अर्थः, न, अकृतेन, इह, कश्चन,
न, च, अस्य, सर्वभूतेषु, कश्चित्, अर्थव्यपाश्रयः ॥

क्योंकि—

इह	=इस संसारमें		(प्रयोजन)
तस्य	=उस(पुरुष)का	न	=नहीं है
कृतेन	=किये जानेसे	च	=तथा
एव	=भी (कोई)	अस्य	=इसका
अर्थः	=प्रयोजन	सर्वभूतेषु	=संपूर्ण भूतोंमें
न	=नहीं है	कश्चित्	=कुछ भी
	(और)	अर्थव्यपाश्रयः	= { स्वार्थका संबन्ध
अकृतेन	=न कियेजानेसे		
कश्चन	=(भी) कोई	न	=नहीं है ॥

(तो भी उसके द्वाराकेवललोक हितार्थ कर्म किये जाते हैं)

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ।१९।

तस्मात्, असक्तः, सततम्, कार्यम्, कर्म, समाचर, असक्तः, हि, आचरन्, कर्म, परम्, आप्नोति, पूरुषः ॥

तस्मात्	=इससे (तूं)	हि	=क्योंकि
असक्तः	=अनासक्तहुआ	असक्तः	=अनासक्त
सततम्	=निरन्तर	पूरुषः	=पुरुष
कार्यम्	=कर्तव्य	कर्म	=कर्म
कर्म	=कर्मका	आचरन्	=करता हुआ
समाचर	= { अच्छी प्रकार आचरण कर	परम्	=परमात्माको
		आप्नोति	=प्राप्त होताहै ॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥२०॥

कर्मणा, एव, हि, संसिद्धिम्, आस्थिताः, जनकादयः, लोकसंग्रहम्, एव, अपि, संपश्यन्, कर्तुम्, अर्हसि ॥

इस प्रकार–

जनकादयः	= { जनकादि ज्ञानीजनभी (आसक्ति रहित)	एव	=ही
		संसिद्धिम्	=परमसिद्धिको
		आस्थिताः	=प्राप्त हुए हैं।
कर्मणा	=कर्मद्वारा	हि	=इसलिये (तथा)

लोकसंग्रहम्	=लोक संग्रह को	कर्तुम्	=कर्म करनेको
संपश्यन्	=देखता हुआ	एव	=ही
अपि	=भी (तूं)	अर्हसि	=योग्य है ॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥

यत्, यत्, आचरति, श्रेष्ठः, तत्, तत्, एव, इतरः, जनः, सः, यत्, प्रमाणम्, कुरुते, लोकः, तत्, अनुवर्तते ॥

क्योंकि-

श्रेष्ठः	=श्रेष्ठ पुरुष		(अनुसारवर्ततेहैं)
यत्	=जो	सः	=वह पुरुष
यत्	=जो	यत्	=जो कुछ
आचरति	=आचरण करता है	प्रमाणम्	=प्रमाण
इतरः	=अन्य	कुरुते	=कर देता है
जनः	=पुरुष (भी)	लोकः	=लोग (भी)
तत्	=उस	तत्	=उसके
तत्	=उसके	अनुवर्तते	=अनुसार[1] बर्तते हैं ॥
एव	=ही		

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥

१—यहां क्रियामें एकवचन है परन्तु लोकशब्द समुदायवाचक होनेसे भाषामें बहुवचन कि क्रिया लिखी गई है।

न, मे, पार्थ, अस्ति, कर्तव्यम्, त्रिषु, लोकेषु, किंचन,
न, अनवाप्तम्, अवाप्तव्यम्, वर्ते, एव, च, कर्मणि ॥

इसलिये–

पार्थ	=हे अर्जुन		(किंचित भी)
मे	=(यद्यपि) मुझे	अवाप्तव्यम्	=प्राप्त होने योग्य वस्तु
त्रिषु	=तीनों	अनवाप्तम्	=अप्राप्त
लोकेषु	=लोकोंमें	न	=नहीं है
किंचन	=कुछ भी		(तो भी मैं)
कर्तव्यम्	=कर्तव्य	कर्मणि	=कर्ममें
न	=नहीं	एव	=ही
अस्ति	=है	वर्ते	=बर्तता हूं ॥
च	=तथा		

यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥२३

यदि, हि, अहम्, न, वर्तेयं, जातु, कर्मणि, अतंद्रितः,
मम, वर्त्म, अनुवर्तंते, मनुष्याः, पार्थ, सर्वशः ॥

हि	=क्योंकि	कर्मणि	=कर्ममें
यदि	=यदि	न	=न
अहम्	=मैं	वर्तेयम्	=वर्तूं (तो)
अतंद्रितः	=सावधान हुआ	पार्थ	=हे अर्जुन
जातु	=कदाचित्	सर्वशः	=सब प्रकारसे

मनुष्याः	=मनुष्य	अनुवर्तंते=	अनुसार वर्तते हैं अर्थात् वर्तने लग जांय ॥
मम	=मेरे		
वर्त्म	=वर्तावके		

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
संकरस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः

उत्सीदेयुः, इमे, लोकाः, न, कुर्याम्, कर्म, चेत्, अहम्,
संकरस्य, च, कर्त्ता, स्याम्, उपहन्याम्, इमाः, प्रजाः ॥

तथा—

चेत्	=यदि	संकरस्य	=वर्णसंकरका
अहम्	=मैं	कर्ता	=करनेवाला
कर्म	=कर्म	स्याम्	=होऊं (तथा)
न	=न	इमाः	=इस सारी
कुर्याम्	=करूं (तो)	प्रजाः	=प्रजाको
इमे	=यह सब	उपहन्याम्=	हनन करूं अर्थात् मारनेवाला बनूं
लोकाः	=लोक		
उत्सीदेयुः	=भ्रष्ट हो जांय		
च	=और (मैं)		

सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत।
कुर्याद्विद्वांस्तथासक्ताश्चिकीर्षुर्लोकसंग्रहम् २५

सक्ताः, कर्मणि, अविद्वांसः, यथा, कुर्वन्ति, भारत,
कुर्यात्, विद्वान्, तथा, असक्तः, चिकीर्षुः, लोकसंग्रहम् ॥

इसलिये—

भारत =हे भारत
कर्मणि =कर्ममें
सक्ताः =आसक्त हुए
अविद्वांसः=अज्ञानी जन
यथा =जैसे
कुर्वन्ति =कर्म करते हैं
तथा =वैसे ही
असक्तः =अनासक्त हुआ
विद्वान् =विद्वान् (भी)
लोकसंग्रहम् ={लोक शिक्षा को
चिकीर्षुः =चाहता हुआ
कुर्यात् =कर्म करे ॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

न, बुद्धिभेदम्, जनयेत्, अज्ञानाम्, कर्मसंगिनाम्, जोषयेत्, सर्वकर्माणि, विद्वान्, युक्तः, समाचरन् ॥२६॥

तथा—

विद्वान् =ज्ञानी पुरुष (कोचाहियेकि)
कर्मसंगिनाम् ={कर्मोंमें आसक्तिवाले
अज्ञानाम्= अज्ञानियोंकी
बुद्धिभेदम् ={बुद्धिमें भ्रम अर्थात् कर्मों में अश्रद्धा
न जनयेत् }=उत्पन्न न करे
(किन्तु स्वयम्)
युक्तः ={परमात्माके स्वरूपमें स्थित हुआ(और)
सर्वकर्माणि }=सब कर्मोंको
समाचरन्={अच्छी प्रकार करता हुआ
(उनसेभी वैसे
जोषयेत् =ही) करावे ॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः
अहंकारविमूढात्मा कर्ताहमिति मन्यते २७

प्रकृतेः, क्रियमाणानि, गुणैः, कर्माणि, सर्वशः, अहंकारविमूढात्मा, कर्ता, अहम्, इति, मन्यते ॥

और हे अर्जुन वास्तवमें—

सर्वशः	=संपूर्ण	अहंकार विमूढात्मा	=अहंकारसे मोहित हुए अन्तःकरण वाला पुरुष
कर्माणि	= कर्म		
प्रकृतेः	=प्रकृतिके		
गुणैः	=गुणों द्वारा		
क्रियमाणानि	=किये हुये हैं	अहम्	=मैं
		कर्ता	=कर्ता हूं
	(तो भी)	इति	=ऐसे
		मन्यते	=मानलेता है ॥

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तंत इति मत्वा न सज्जते २८॥

तत्त्ववित्, तु, महाबाहो, गुणकर्मविभागयोः, गुणाः, गुणेषु, वर्तन्ते, इति, मत्वा, न, सज्जते ॥

तु	=परन्तु	गुणकर्मविभागयोः	=गुण[1] विभाग और कर्म[2] विभागके
महाबाहो	=हे महाबाहो		

(१)(२) त्रिगुणात्मक मायाके कार्यरूप पांच महाभूत और

तत्त्ववित्	= तत्त्वको[1] जाननेवाला (ज्ञानी पुरुष)	वर्त्तन्ते	= वर्तते हैं
		इति	= ऐसे
		मत्वा	= मानकर
गुणाः	= संपूर्णगुण	न	= नहीं
गुणेषु	= गुणोंमें	सज्जते	= आसक्त होता है

प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु ।
तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत्

प्रकृतेः, गुणसंमूढाः, सज्जंते, गुणकर्मसु, तान्, अकृत्स्नविदः, मंदान्, कृत्स्नवित्, न, विचालयेत् ॥२६॥

और—

प्रकृतेः	= प्रकृतिके	मन्दान्	= मूर्खोंको
गुणसंमूढाः	= गुणोंसेमोहित हुए पुरुष	कृत्स्नवित्	= अच्छी प्रकार जाननेवाला (ज्ञानी पुरुष)
गुणकर्मसु	= गुण और कर्मोंमें		
सज्जंते	= आसक्तहोते हैं	न विचालयेत्	= चलायमान न करे ॥
तान्	= उन		
अकृत्स्नविदः	= अच्छीप्रकार न समझने वाले		

मन बुद्धि अहंकार तथा पांच ज्ञानेन्द्रियां पांच कर्मेन्द्रियां और शब्दादि पांच विषय इन सबके समुदायका नाम 'गुणविभाग' है और इनकी परस्परकी चेष्टाओंका नाम 'कर्मविभाग' है ।

(१) उपरोक्त 'गुणविभाग' और 'कर्मविभाग' से आत्माको पृथक् अर्थात् निर्लेप जानना ही इनका तत्व जानना है ।

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः
मयि, सर्वाणि, कर्माणि, संन्यस्य, अध्यात्मचेतसा,
निराशीः, निर्ममः, भूत्वा, युध्यस्व, विगतज्वरः ॥३०॥

इसलिये हे अर्जुन तूं-

अध्यात्म-चेतसा	=ध्याननिष्ठ चित्तसे		(और)
सर्वाणि	=संपूर्ण	निर्ममः	=ममता रहित
कर्माणि	= कर्मोंको	भूत्वा	=होकर
मयि	=मुझमें	विगत-ज्वरः	=संताप रहित (हुआ)
संन्यस्य	=समर्पण करके	युध्यस्व	=युद्ध कर ॥
निराशीः	=आशा रहित		

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः ।
श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥
ये, मे, मतम्, इदम्, नित्यम्, अनुतिष्ठंति, मानवाः,
श्रद्धावंतः, अनसूयंतः, मुच्यंते, ते, अपि, कर्मभिः ॥३१॥

और हे अर्जुन-

ये	=जो कोई		(और)
अपि	=भी	श्रद्धावंतः	=श्रद्धासे युक्त हुए
मानवाः	=मनुष्य	नित्यम्	=सदा ही
अनसूयन्तः	=दोष बुद्धिसे रहित	मे	=मेरे
		इदम्	=इस

मतम्	=मतके	ते	=वे पुरुष
अनुति-ष्ठंति	=अनुसार वर्तते हैं	कर्मभिः	=संपूर्ण कर्मों
		मुच्यन्ते	=छूट जातेहैं

ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम्
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥३

ये, तु, एतत्, अभ्यसूयंतः, न, अनुतिष्ठंति, मे, मत
सर्वज्ञानविमूढान्, तान्, विद्धि, नष्टान्, अचेतसः॥

तु	=और	न अनु-तिष्ठंति	=अनुसार न वर्तते हैं
ये	=जो	तान्	= उन
अभ्यसू-यन्तः	=दोषदृष्टि वाले	सर्वज्ञान-विमूढान्	=संपूर्ण ज्ञा में मोहित चित्तवालों
अचेतसः	=मूर्ख लोग		(तूं कल्याण
एतत्	=इस	नष्टान्	=भ्रष्ट हुए(
मे	=मेरे	विद्धि	=जान॥
मतम्	=मतके		

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि
प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति

सदृशम्, चेष्टते, स्वस्याः, प्रकृतेः, ज्ञानवान्, अ
प्रकृतिम्, यान्ति, भूतानि, निग्रहः, किम्, करिष्यति॥३

क्योंकि—

भूतानि	=सभी प्राणी	स्वस्याः	=अपनी
प्रकृतिम्	=प्रकृतिको	प्रकृतेः	=प्रकृतिके
यान्ति	=प्राप्तहोतेहैं अर्थात् अपने स्वभावसे परवश हुए कर्म करते हैं	सदृशम्	=अनुसार
		चेष्टते	=चेष्टा करताहै (फिरदूसराकोई)
		किम्	=क्या
ज्ञानवान्	=ज्ञानवान्	निग्रहः	=हठ
अपि	=भी	करिष्यति	=करेगा ॥

इन्द्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४

इन्द्रियस्य, इन्द्रियस्य, अर्थे, रागद्वेषौ, व्यवस्थितौ, तयोः, न, वशम्, आगच्छेत्, तौ, हि, अस्य, परिपंथिनौ ॥

इसलिये मनुष्यको चाहिये कि—

इन्द्रियस्य	=इन्द्रिय	न	=नहीं
इन्द्रियस्य	=इन्द्रियके	आगच्छेत्	=होवे
अर्थे	=अर्थमें अर्थात् सभी इन्द्रियों के भोगोंमें	हि	=क्योंकि
		अस्य	=इसके
		तौ	=वे दोनों(ही)
व्यवस्थितौ	=स्थित (जो)	परिपंथिनौ	=कल्याण मार्गमें विघ्न करनेवाले महान्शत्रुहैं
रागद्वेषौ	=रागऔरद्वेषहैं		
तयोः	=उन दोनोंके		
वशम्	=वशमें		

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३५॥

श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात्, स्वधर्मे, निधनम्, श्रेयः, परधर्मः, भयावहः ॥

इसलिये उन दोनोंको जीतकर सावधान हुआ स्वधर्मका आचरण करे क्योंकि–

स्वनुष्ठितात् = अच्छी प्रकार आचरण किये हुए
परधर्मात् = दूसरेके धर्मसे
विगुणः = गुण रहित
(अपि) = भी
स्वधर्मः = अपना धर्म
श्रेयान् = अतिउत्तम है
स्वधर्मे = अपने धर्ममें
निधनम् = मरना (भी)
श्रेयः = कल्याणकारक है (और)
परधर्मः = दूसरेका धर्म
भयावहः = भयको देने वाला है ॥

अर्जुन उवाच

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥

अथ, केन, प्रयुक्तः, अयं, पापं, चरति, पूरुषः, अनिच्छन्, अपि, वार्ष्णेय, बलात्, इव, नियोजितः ॥३६॥

इसपर अर्जुनने पूछा कि–

वार्ष्णेय = हे कृष्ण । अथ = फिर

अयम् = यह
पूरुषः = पुरुष
बलात् = बलात्कारसे
नियोजितः = लगाये हुए के
इव = सदृश
अनिच्छन् = न चाहता हुआ
अपि = भी
केन = किससे
प्रयुक्तः = प्रेरा हुआ
पापम् = पापका
चरति = आचरण करता है ॥

श्रीभगवानुवाच ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

कामः, एषः, क्रोधः, एषः, रजोगुणसमुद्भवः, महाशनः, महापाप्मा, विद्धि, एनम्, इह, वैरिणम् ॥३७॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण महाराज बोले हे अर्जुन–

रजोगुणसमुद्भवः = रजोगुणसे उत्पन्न हुआ
एषः = यह
कामः = काम (ही)
क्रोधः = क्रोध है
एषः = यह (ही)
महाशनः = महाअशन अर्थात् अग्निके सदृश भोगोंसे न तृप्त होनेवाला
(और)
महापाप्मा = बड़ा पापी है
इह = इस विषयमें
एनम् = इसको (ही)
(तूं)
वैरिणम् = वैरी
विद्धि = जान ॥

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ३८

धूमेन, आव्रियते, वह्निः, यथा, आदर्शः, मलेन, च, यथा, उल्बेन, आवृतः, गर्भः, तथा, तेन, इदम्, आवृतम्॥

यथा	=जैसे	यथा	=जैसे
धूमेन	=धूयेंसे	उल्बेन	=जेरसे
वह्निः	=अग्नि	गर्भः	=गर्भ
च	=और	आवृतः	=ढका हुआ है
मलेन	=मलसे	तथा	=वैसे ही
आदर्शः	=दर्पण	तेन	=उसकामकेद्वारा
आव्रियते	=ढका जाता है (तथा)	इदम्	=यह (ज्ञान)
		आवृतम्	=ढका हुआहै॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥३९॥

आवृतम्, ज्ञानम्, एतेन, ज्ञानिनः, नित्यवैरिणा, कामरूपेण, कौंतेय, दुष्पूरेण, अनलेन, च ॥

च	=और	दुष्पूरेण	=न पूर्णहोनेवाले
कौन्तेय	=हे अर्जुन	कामरूपेण	=कामरूप
एतेन	=इस		
अनलेन	=अग्नि (सदृश)	ज्ञानिनः	=ज्ञानियोंके

नित्य-वैरिणा	= नित्य वैरीसे	ज्ञानम्	= ज्ञान
		आवृतम्	= ढका हुआ है ॥

इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥

इन्द्रियाणि, मनः, बुद्धिः, अस्य, अधिष्ठानम्, उच्यते, एतैः, विमोहयति, एषः, ज्ञानम्, आवृत्य, देहिनम् ॥

तथा—

इंद्रियाणि	= इन्द्रियां	एतैः	= इन (मनबुद्धि और इंद्रियों) द्वारा ही
मनः	= मन (और)		
बुद्धिः	= बुद्धि		
अस्य	= इसके	ज्ञानम्	= ज्ञानको
अधिष्ठानम्	= वासस्थान	आवृत्य	= आच्छादित करके (इस)
उच्यते	= कहे जातेहैं (और)	देहिनम्	= जीवात्माको
एषः	= यह (काम)	विमोहयति	= मोहित करता है ॥

तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ४१

तस्मात्, त्वम्, इन्द्रियाणि, आदौ, नियम्य, भरतर्षभ, पाप्मानम्, प्रजहि, हि, एनम्, ज्ञानविज्ञाननाशनम् ॥

तस्मात्	=इसलिये	ज्ञानवि-ज्ञाननाश-नम्	= ज्ञानऔरवि-ज्ञानके नाश करनेवाले
भरतर्षभ	=हे अर्जुन	एनम्	=इस (काम)
त्वम्	=तूं	पाप्मानम्	=पापीको
आदौ	= पहिले	हि	=निश्चयपूर्वक
इंद्रियाणि	=इन्द्रियोंको	प्रजहि	=मार ॥
नियम्य	=वशमें करके		

इन्द्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२

इन्द्रियाणि, पराणि, आहुः, इन्द्रियेभ्यः, परम्, मनः, मनसः, तु, परा, बुद्धिः, यः, बुद्धेः, परतः, तु, सः ॥

और यदि तूं समझे कि इन्द्रियोंको रोककर कामरूप बैरीको मारनेकी मेरी शक्ति नहीं है तो तेरी यह भूल है क्योंकि इस शरीरसे तो–

इंद्रियाणि	=इन्द्रियोंको	परम्	=परे
पराणि	= परे (श्रेष्ठ बलवान् और सूक्ष्म)	मनः	=मन है
आहुः	=कहते हैं (और)	तु	=और
इंद्रियेभ्यः	=इन्द्रियोंसे	मनसः	=मनसे
		परा	=परे
		बुद्धिः	=बुद्धि है
		तु	=और

यः	=जो	परतः	=अत्यन्त परेहै
बुद्धेः	=बुद्धिसे (भी)	सः	=वह (आत्माहै)

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३

एवम्, बुद्धेः, परम्, बुद्ध्वा, संस्तभ्य, आत्मानम्, आत्मना, जहि, शत्रुम्, महाबाहो, कामरूपम्, दुरासदम् ॥

एवम्	=इस प्रकार	आत्मानम्	=मनको
बुद्धेः	=बुद्धिसे	संस्तभ्य	=वशमें करके
परम्	=परे अर्थात् सूक्ष्म तथा सब प्रकार वलवान् और श्रेष्ठ अपने आत्माको	महाबाहो	=हे महाबाहो अपनी शक्ति कोसमझकर
		दुरासदम्	=(इस) दुर्जय
		कामरूपम्	=कामरूप
बुद्ध्वा	=जानकर (और)	शत्रुम्	=शत्रुको
आत्मना	=बुद्धिके द्वारा	जहि	=मार ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगोनाम तृतीयोऽध्यायः॥३॥

हरि ॐ तत्सत् हरि ॐ तत्सत् हरि ॐ तत्सत्

ॐ

श्रीपरमात्मनेनमः

अथ चतुर्थोऽध्यायः ॥

श्रीभगवानुवाच

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥

इमम्, विवस्वते, योगम्, प्रोक्तवान्, अहम्, अव्ययम्, विवस्वान्, मनवे, प्राह, मनुः, इक्ष्वाकवे, अब्रवीत् ॥

इसके उपरान्त श्रीकृष्ण महाराज बोले हे अर्जुन–

अहम् = मैंने
इमम् = इस
अव्ययम् = अविनाशी
योगम् = योगको (कल्पके आदिमें)
विवस्वते = सूर्यके प्रति
प्रोक्तवान् = कहा था (और)
विवस्वान् = सूर्यने (अपने पुत्र)
मनवे = मनुके प्रति
प्राह = कहा (और)
मनुः = मनुने
इक्ष्वाकवे = अपने पुत्र राजा इक्ष्वाकु के प्रति
अब्रवीत् = कहा ॥

एवं परंपराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥२॥

एवम्, परम्पराप्राप्तम्, इमम्, राजर्षयः, विदुः, सः, कालेन, इह, महता, योगः, नष्टः, परंतप ॥

एवम्	=इस प्रकार	सः	=वह
परंपरा-प्राप्तम्	=परम्परासे प्राप्त हुए	योगः	=योग
		महता	=बहुत
इमम्	=इस (योगको)	कालेन	=कालसे
राजर्षयः	=राजर्षियोंने	इह	=इस (पृथिवी) लोकमें
विदुः	=जाना (परन्तु)	नष्टः	=लोप (प्रायः) होगया था ॥
परंतप	=हे अर्जुन		

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्

सः, एव, अयम्, मया, ते, अद्य, योगः, प्रोक्तः, पुरातनः, भक्तः, असि, मे, सखा, च, इति, रहस्यम्, हि, एतत्, उत्तमम् ॥३॥

सः	=वह	हि	=क्योंकि (तूं)
एव	=ही	मे	=मेरा
अयम्	=यह	भक्तः	=भक्त
पुरातनः	=पुरातन	च	=और
योगः	=योग	सखा	=प्रिय सखा
अद्य	=अब	असि	=है
मया	=मैंने	इति	=इसलिये (तथा)
ते	=तेरे लिये		
प्रोक्तः	=वर्णन कियाहै	एतत्	=यह (योग)

उत्तमम्	=बहुत उत्तम (और)	रहस्यम्	= रहस्य अर्थात् अति मर्मका विषय है ॥

अर्जुन उवाच

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ।४

अपरम्, भवतः, जन्म, परम्, जन्म, विवस्वतः, कथम्, एतत्, विजानीयाम्, त्वम्, आदौ, प्रोक्तवान्, इति ॥

इस प्रकार भगवान् श्रीकृष्णचन्द्र महाराजके वचन सुनकर अर्जुनने पूछा हे भगवन्—

भवतः	=आपका	एतत्	=इस योगको (कल्पके)
जन्म	=जन्म (तो)	आदौ	=आदिमें
अपरम्	= आधुनिक अर्थात् अब हुआ है और	त्वम्	=आपने
		प्रोक्तवान्	=कहा था
विवस्वतः	=सूर्यका	इति	=यह (मैं)
जन्म	=जन्म	कथम्	=कैसे
परम्	=बहुत पुराना है (इसलिये)	विजानीयाम्	=जानूं ॥

श्रीभगवानुवाच

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥५॥

बहूनि, मे, व्यतीतानि, जन्मानि, तव, च, अर्जुन, तानि, अहम्, वेद, सर्वाणि, न, त्वम्, वेत्थ, परंतप ॥

इसपर श्रीकृष्ण महाराज बोले-

अर्जुन	=हे अर्जुन	परंतप	=हे परंतप
मे	=मेरे	तानि	=उन
च	=और	सर्वाणि	=सबको
तव	=तेरे	त्वम्	=तूं
बहूनि	=बहुतसे	न	=नहीं
जन्मानि	=जन्म	वेत्थ	=जानता है
व्यतीतानि	=हो चुके हैं (परन्तु)	अहम्	=(और) मैं
		वेद	=जानता हूं ॥

अजोपि सन्नव्ययात्मा भूतानामीश्वरोपिसन्
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥

अजः, अपि, सन्, अव्ययात्मा, भूतानाम्, ईश्वरः, अपि, सन्, प्रकृतिम्, स्वाम्, अधिष्ठाय, संभवामि, आत्ममायया ॥६॥

तथा मेरा जन्म प्राकृत मनुष्योंके सदृश नहीं है—

	(मैं)	अपि	=भी (तथा)
अव्ययात्मा	=अविनाशी स्वरूप	भूतानाम्	=सब भूत प्राणियोंका
अजः	=अजन्मा	ईश्वरः	=ईश्वर
सन्	=होनेपर	सन्	=होनेपर

अपि	=भी	आत्म-मायया	=योगमायासे
स्वाम्	=अपनी	संभवामि	=प्रकट होता हूं
प्रकृतिम्	=प्रकृतिको		
अधिष्ठाय	=आधीन करके		

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्

यदा, यदा, हि, धर्मस्य, ग्लानिः, भवति, भारत, अभ्युत्थानम्, अधर्मस्य, तदा, आत्मानम्, सृजामि, अहम् ॥७॥

भारत	=हे भारत	भवति	=होती है
यदा	=जब	तदा	=तब तब
यदा	=जब	हि	=ही
धर्मस्य	=धर्मकी	अहम्	=मैं
ग्लानिः	=हानि (और)	आत्मानम्	=अपने रूपको
अधर्मस्य	=अधर्मकी	सृजामि	=रचता हूं अर्थात् प्रकट करता हूं ॥
अभ्युत्थानम्	=वृद्धि		

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥८॥

परित्राणाय, साधूनाम्, विनाशाय, च, दुष्कृताम्, धर्मसंस्थापनार्थाय, संभवामि, युगे, युगे ॥

क्योंकि-

साधूनाम्	= साधु पुरुषोंका		विनाशाय	= नाश करनेके लिये (तथा)
परित्राणाय	= उद्धार करने के लिये		धर्मसंस्थापनार्थाय	= धर्म स्थापन करनेकेलिये
च	= और		युगे	= युग
दुष्कृताम्	= दूषितकर्म करनेवालोंका		युगे	= युगमें
			संभवामि	= प्रकट होता हूं

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

जन्म, कर्म, च, मे, दिव्यम्, एवम्, यः, वेत्ति, तत्त्वतः, त्यक्त्वा, देहम्, पुनः, जन्म, न, एति, माम्, एति, सः, अर्जुन ॥९॥

इसलिये-

अर्जुन	= हे अर्जुन		दिव्यम्	= दिव्यअर्थात् अलौकिक है
मे	= मेरा (वह)		एवम्	= इस प्रकार
जन्म	= जन्म		यः	= जो पुरुष
च	= और		तत्त्वतः	= तत्त्वसे[1]
कर्म	= कर्म			

---

(१) सर्व शक्तिमान् सच्चिदानन्द घन परमात्मा अज अविनाशी और सर्व भूतोंके परम गति तथा परम आश्रय हैं वे केवल धर्मको स्थापन करने और संसारका उद्धार करनेके लिये ही अपनी योगमायासे सगुण

वेत्ति	=जानता है	न	=नहीं
सः	=वह	एति	=प्राप्त होता है (किन्तु)
देहम्	=शरीरको	माम्	=मुझे (ही)
त्यक्त्वा	=त्यागकर	एति	=प्राप्त होताहै ॥
पुनः	=फिर		
जन्म	=जन्मको		

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ।१०

वीतरागभयक्रोधाः, मन्मयाः, माम्, उपाश्रिताः, बहवः, ज्ञानतपसा, पूताः, मद्भावम्, आगताः ॥

और हे अर्जुन पहिले भी—

वीतराग-भयक्रोधाः	= रागभयऔर क्रोधसेरहित	उपाश्रिताः	=शरण हुए
		बहवः	=बहुतसे पुरुष
मन्मयाः	= अनन्य भाव-से मेरेमें स्थितिवाले	ज्ञानतपसा	=ज्ञानरूप तपसे
		पूताः	=पवित्र हुए
		मद्भावम्	=मेरे स्वरूपको
माम्	= मेरे	आगताः	=प्राप्तहोचुकेहैं॥

ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ।११

रूप होकर प्रकट होते हैं इसलिये परमेश्वरके समान सुहृद् प्रेमी और पतित-पावन दूसरा कोई नहीं है ऐसा समझकर जो पुरुष परमेश्वरका अनन्य प्रेमसे निरन्तर चिंतन करता हुआ आसक्तिरहित संसारमें वर्तता है वही उनको तत्वसे जानता है ।

ये, यथा, माम्, प्रपद्यन्ते, तान्, तथा, एव, भजामि, अहम्, मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः ॥

क्योंकि–

पार्थ	=हे अर्जुन	भजामि	=भजता हूं (इस रहस्यको जान करही)
ये	=जो		
माम्	=मेरेको		
यथा	=जैसे	मनुष्याः	={बुद्धिमान् मनुष्यगण
प्रपद्यन्ते	=भजते हैं		
अहम्	=मैं (भी)	सर्वशः	=सब प्रकारसे
तान्	=उनको	मम	=मेरे
तथा	=वैसे	वर्त्म	=मार्गके
एव	=ही	अनुवर्तंते	=अनुसारवर्ततेहैं

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा १२

कांक्षंतः, कर्मणाम्, सिद्धिम्, यजंते, इह, देवताः, क्षिप्रम्, हि, मानुषे, लोके, सिद्धिः, भवति, कर्मजा ॥

और जो मेरेको तत्त्वसे नहीं जानते हैं वे पुरुष–

इह	=इस	कांक्षंतः	=चाहते हुए
मानुषे	=मनुष्य	देवताः	=देवताओंको
लोके	=लोकमें	यजन्ते	=पूजते हैं (और)
कर्मणाम्	=कर्मोंके	कर्मजा	={(उनके) कर्मों से उत्पन्न हुई
सिद्धिम्	=फलको		

सिद्धिः	=सिद्धि (भी)	हि	=ही
क्षिप्रम्	=शीघ्र	भवति	=होती है

परन्तु उनको मेरी प्राप्ति नहीं होती इसलिये तूं मेरेको ही सब प्रकारसे भज ॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम् ॥

चातुर्वर्ण्यं, मया, सृष्टम्, गुणकर्मविभागशः, तस्य, कर्त्तारम्, अपि, माम्, विद्धि, अकर्त्तारम्, अव्ययम् ॥१३॥

तथा हे अर्जुन–

गुणकर्म-विभागशः	=गुण और कर्मों के विभागसे	कर्त्तारम्	=कर्त्ताको
		अपि	=भी
चातुर्वर्ण्यम्	=ब्राह्मण क्षत्रिय वैश्य और शूद्र	माम्	=मुझ
		अव्ययम्	=अविनाशी परमेश्वरको तूं
मया	=मेरे द्वारा	अकर्त्तारम्	=अकर्त्ता ही
सृष्टम्	=रचे गयेहैं	विद्धि	=जान ॥
तस्य	=उनके		

न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ॥

न, माम्, कर्माणि, लिंपंति, न, मे, कर्मफले, स्पृहा, इति, माम्, यः, अभिजानाति, कर्मभिः, न, सः, बध्यते ॥१४॥

क्योंकि–

कर्मफले	=कर्मोंके फलमें	इति	=इस प्रकार
मे	=मेरी	यः	=जो
स्पृहा	=स्पृहा	माम्	=मेरेको
न	=नहीं है (इसलिये)	अभिजानाति	=तत्त्वसे जानता है
माम्	=मेरेको	सः	=वह (भी)
कर्माणि	=कर्म	कर्मभिः	=कर्मोंसे
न लिंपन्ति	=लिपायमान नहीं करते	न	=नहीं
		बध्यते	=बन्धता है ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् १५

एवम्, ज्ञात्वा, कृतम्, कर्म, पूर्वैः, अपि, मुमुक्षुभिः, कुरु, कर्म, एव, तस्मात्, त्वम्, पूर्वैः, पूर्वतरम्, कृतम् ॥

तथा–

पूर्वैः	=पहिलेहोनेवाले	तस्मात्	=इससे
मुमुक्षुभिः	=मुमुक्षु पुरुषों द्वारा	त्वम्	=तूं (भी)
		पूर्वैः	= पूर्वजों द्वारा
अपि	=भी	पूर्वतरम् कृतम्	=सदासे किये हुए
एवम्	=इस प्रकार		
ज्ञात्वा	=जानकर(ही)	कर्म	=कर्मको
कर्म	=कर्म	एव	=ही
कृतम्	=किया गया है	कुरु	=कर ॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्

किम्, कर्म, किम्, अकर्म, इति, कवयः, अपि, अत्र, मोहिताः, तत्, ते, कर्म, प्रवक्ष्यामि, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात् ॥१६॥

परन्तु-

कर्म	=कर्म	कर्म	= कर्म अर्थात् कर्मोंका तत्व
किम्	=क्या है (और)	ते	=तेरे लिये
अकर्म	=अकर्म	प्रवक्ष्यामि	= अच्छी प्रकार कहूंगा कि
किम्	=क्या है		
इति	=ऐसे		
अत्र	=इस विषयमें	यत्	=जिसको
कवयः	=बुद्धिमान् पुरुष	ज्ञात्वा	=जानकर (तूं)
अपि	=भी	अशुभात्	= अशुभ अर्थात् संसारबंधनसे
मोहिताः	=मोहित हैं		
तत्	=(इसलियेमैं) वह	मोक्ष्यसे	=छूट जायगा ॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः १७

कर्मणः, हि, अपि, बोद्धव्यम्, बोद्धव्यम्, च, विकर्मणः, अकर्मणः, च, बोद्धव्यम्, गहना, कर्मणः, गतिः ॥

कर्मणः	=कर्मका स्वरूप	विकर्मणः	=निषिद्धकर्म का स्वरूप भी
अपि	=भी	बोद्धव्यम्	=जानना चाहिये
बोद्धव्यम्	=जानना चाहिये	हि	=क्योंकि
च	=और	कर्मणः	=कर्मकी
अकर्मणः	=अकर्मका स्वरूप भी	गतिः	=गति
बोद्धव्यम्	=जानना चाहिये	गहना	=गहन है ॥
च	=तथा		

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥

कर्मणि, अकर्म, यः, पश्येत्, अकर्मणि, च, कर्म, यः, सः, बुद्धिमान्, मनुष्येषु, सः, युक्तः, कृत्स्नकर्मकृत् ॥१८॥

यः	=जो पुरुष	यः	=जो पुरुष
कर्मणि	=कर्ममें अर्थात् अहंकाररहित् की हुई संपूर्ण चेष्टाओंमें	अकर्मणि	=अकर्ममें अर्थात् अज्ञानी पुरुष द्वारा किये हुए संपूर्ण क्रियाओंके त्यागमें भी
अकर्म	=अकर्म अर्थात् वास्तवमें उनका न होनापना	कर्म	=कर्मको अर्थात् त्यागरूप क्रियाको (देखे)
पश्येत्	=देखे		
च	=और	सः	=वह पुरुष

मनुष्येषु	=मनुष्योंमें	युक्तः	=योगी
बुद्धिमान्	=बुद्धिमान् है	कृत्स्नकर्मकृत्	=संपूर्णकर्मोंका करनेवाला है
सः	=(और) वह		

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः १९

यस्य, सर्वे, समारंभाः, कामसंकल्पवर्जिताः, ज्ञानाग्निदग्धकर्माणम्, तम्, आहुः, पंडितम्, बुधाः ॥

और हे अर्जुन–

यस्य	=जिसके	ज्ञानाग्निदग्धकर्माणम्	=ज्ञानरूप अग्नि द्वारा भस्म हुए कर्मोंवाले पुरुषको
सर्वे	=संपूर्ण	बुधाः	=ज्ञानीजन (भी)
समारंभाः	=कार्य	पंडितम्	=पंडित
कामसंकल्पवर्जिताः	=कामना और संकल्पसे रहित हैं	आहुः	=कहते हैं ॥
तम्	=(ऐसे) उस		

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः॥

त्यक्त्वा, कर्मफलासंगम्, नित्यतृप्तः, निराश्रयः, कर्मणि, अभिप्रवृत्तः, अपि, न, एव, किंचित्, करोति, सः ॥२०॥

और जो पुरुष–

निराश्रयः	=सांसारिकआश्रयसे रहित	नित्यतृप्तः	=सदा परमानन्द परमात्मामेंतृप्तहै.

सः	= वह	अभिप्रवृत्तः	= अच्छी प्रकार वर्तता हुआ
कर्मफलासंगम्	= कर्मोंके फल और संग अर्थात् कर्तृत्व अभिमानको	अपि	= भी
		किंचित्	= कुछ
		एव	= भी
त्यक्त्वा	= त्यागकर	न	= नहीं
कर्मणि	= कर्ममें	करोति	= करता है ॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

निराशीः, यतचित्तात्मा, त्यक्तसर्वपरिग्रहः, शारीरम्, केवलम्, कर्म, कुर्वन्, न, आप्नोति, किल्बिषम् ॥२१॥

और-

यतचित्तात्मा	= जीतलियाहै अन्तःकरण और शरीर जिसने (तथा)	केवलम्	= केवल
		शारीरम्	= शरीर संबंधी
		कर्म	= कर्मको
		कुर्वन्	= करताहुआ (भी)
त्यक्तसर्वपरिग्रहः	= त्याग दी है संपूर्ण भोगों की सामग्री जिसने	किल्बिषम्	= पापको
		न	= नहीं
		आप्नोति	= प्राप्त होता है ॥
निराशीः	= (ऐसा) आशा रहित पुरुष		

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबद्ध्यते ॥

यदृच्छालाभसंतुष्टः, द्वंद्वातीतः, विमत्सरः, समः, सिद्धौ, असिद्धौ, च, कृत्वा, अपि, न, निबद्ध्यते ॥२२॥

और-

यदृच्छा-लाभसं-तुष्टः	= अपने आप जो कुछ आ प्राप्त हो उसमें ही संतुष्ट रहनेवाला	सिद्धौ	= सिद्धि
		च	= और
		असिद्धौ	= असिद्धिमें
		समः	= समत्व भाव-वाला पुरुष (कर्मोंको)
द्वंद्वातीतः	= (और) हर्षशोकादि द्वंद्वोंसे अतीत हुआ	कृत्वा	= करके
		अपि	= भी
विमत्सरः	= (तथा) मत्सरता अर्थात् ईर्षासे रहित	न	= नहीं
		निबद्ध्यते	= बन्धता है ॥

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥२३॥

गतसंगस्य, मुक्तस्य, ज्ञानावस्थितचेतसः, यज्ञाय, आचरतः, कर्म, समग्रम्, प्रविलीयते ॥

क्योंकि-

गतसंगस्य = आसक्तिसे रहित
ज्ञानावस्थितचेतसः = ज्ञानमें स्थित हुए चित्तवाले
यज्ञाय = यज्ञके लिये
आचरतः = आचरण करते हुए
मुक्तस्य = मुक्तपुरुषके
समग्रम् = संपूर्ण
कर्म = कर्म
प्रविलीयते = नष्ट होजाते हैं

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥

ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्माग्नौ, ब्रह्मणा, हुतम्, ब्रह्म, एव, तेन, गंतव्यम्, ब्रह्मकर्मसमाधिना ॥

उन यज्ञके लिये आचरण करनेवाले पुरुषोंमेंसे कोई तो इस भावसे यज्ञ करते हैं कि—

अर्पणम् = अर्पण अर्थात् स्रुवादिक भी
ब्रह्म = ब्रह्म है (और)
हविः = हवि अर्थात् हवन करने योग्य द्रव्य भी
ब्रह्म = ब्रह्म है (और)
ब्रह्माग्नौ = ब्रह्मरूप अग्निमें
ब्रह्मणा = ब्रह्मरूप कर्त्ता के द्वारा (जो)
हुतम् = हवन किया गया है (वह भी ब्रह्म ही है इसलिये)
ब्रह्मकर्मसमाधिना = ब्रह्मरूप कर्म में समाधिस्थ हुए
तेन = उस पुरुषद्वारा (जो)
गंतव्यम् = प्राप्त होने योग्य है

ब्रह्म =(वह भी) ब्रह्म | एव =ही है ॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

दैवम्, एव, अपरे, यज्ञम्, योगिनः, पर्युपासते,
ब्रह्माग्नौ, अपरे, यज्ञम्, यज्ञेन, एव, उपजुह्वति ॥

और-

अपरे =दूसरे
योगिनः =योगीजन
दैवम् =देवताओंके पूजनरूप
यज्ञम् =यज्ञको
एव =ही
पर्युपासते =अच्छीप्रकार उपासते हैं अर्थात् करते हैं
अपरे =(और) दूसरे

(ज्ञानीजन)
ब्रह्माग्नौ =परब्रह्म परमात्मारूप अग्निमें
यज्ञेन =यज्ञके द्वारा
एव =ही
यज्ञम् =यज्ञको
उपजुह्वति =हवन* करते हैं ॥

श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति ॥

श्रोत्रादीनि, इंद्रियाणि, अन्ये, संयमाग्निषु, जुह्वति,
शब्दादीन्, विषयान्, अन्ये, इन्द्रियाग्निषु, जुह्वति ॥२६॥

---

* परब्रह्म परमात्मामें ज्ञान द्वारा एकीभावसे स्थित होना ही ब्रह्मरूप अग्निमें यज्ञके द्वारा यज्ञको हवन करना है ।

और-

अन्ये	= अन्य योगीजन	अन्ये	= और दूसरे योगीलोग
श्रोत्रादीनि	= श्रोत्रादिक	शब्दादीन्	= शब्दादिक
इंद्रियाणि	= सब इंद्रियोंको	विषयान्	= विषयोंको
संयमाग्निषु	= संयम अर्थात् स्वाधीनतारूप अग्निमें	इन्द्रियाग्निषु	= इन्द्रियरूप अग्निमें
जुह्वति	= हवन करते हैं अर्थात् इन्द्रियोंको विषयों से रोक कर अपने वशमें कर लेते हैं	जुह्वति	= हवन करते हैं अर्थात् रागद्वेष रहित इंद्रियों द्वारा विषयों-को ग्रहण करते हुए भी भस्म रूप करते हैं ॥

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥

सर्वाणि, इन्द्रियकर्माणि, प्राणकर्माणि, च, अपरे, आत्मसंयमयोगाग्नौ, जुह्वति, ज्ञानदीपिते ॥२७॥

और-

अपरे	= दूसरे योगीजन	प्राणकर्माणि	= प्राणोंके व्यापार को
सर्वाणि	= संपूर्ण	ज्ञानदीपिते	= ज्ञानसे प्रकाशित हुई
इन्द्रियकर्माणि	= इन्द्रियोंकी चेष्टाओंको		
च	= तथा		

आत्मसंयमयोगाग्नौ = परमात्मामें स्थितिरूप योगाग्निमें	जुह्वति = हवन* करतेहैं ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥

द्रव्ययज्ञाः, तपोयज्ञाः, योगयज्ञाः, तथा, अपरे, स्वाध्यायज्ञानयज्ञाः, च, यतयः, संशितव्रताः ॥२८॥

और—

अपरे = दूसरेकई पुरुष	च = और दूसरे
द्रव्ययज्ञाः = ईश्वर अर्पणबुद्धि से लोक सेवामें द्रव्य लगानेवाले हैं	संशितव्रताः = अहिंसादि तीक्ष्णव्रतोंसेयुक्त
तथा = वैसेही (कईपुरुष)	यतयः = यत्नशील पुरुष
तपोयज्ञाः = स्वधर्म पालनरूप तपयज्ञको करने वाले हैं (और कई)	स्वाध्यायज्ञानयज्ञाः = भगवान्‌के नामका जप तथा भगवत्प्राप्ति विषयक शास्त्रोंका अध्ययन रूप ज्ञान यज्ञके करनेवाले हैं ॥
योगयज्ञाः = अष्टांग योगरूप यज्ञको करनेवाले हैं	

* सच्चिदानन्दघन परमात्माके सिवाय अन्य किसीका भी न चिन्तन करना ही उन सबका हवन करना है ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥

अपाने, जुह्वति, प्राणम्, प्राणे, अपानम्, तथा, अपरे, प्राणापानगती, रुद्ध्वा, प्राणायामपरायणाः ॥ २९ ॥

और दूसरे योगीजन–

अपाने	=अपानवायुमें	अपरे	=(तथा) अन्य योगीजन
प्राणम्	=प्राणवायुको	प्राणापानगती	=प्राण और अपानकी गतीको
जुह्वति	=हवन करते हैं	रुद्ध्वा	= रोककर
तथा	=वैसे ही (अन्ययोगीजन)	प्राणायामपरायणाः	=प्राणायामके परायण (होते हैं)
प्राणे	=प्राणवायुमें		
अपानम्	=अपानवायुको		
(जुह्वति)	=हवन करते हैं		

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥३०

अपरे, नियताहाराः, प्राणान्, प्राणेषु, जुह्वति, सर्वे, अपि, एते, यज्ञविदः, यज्ञक्षपितकल्मषाः ॥

और–

अपरे	=दूसरे	नियताहाराः	=नियमित* आहारकरनेवाले योगीजन

* गीता अध्याय ६ श्लोक १७ में देखना चाहिये ।

प्राणान् = प्राणोंको
प्राणेषु = प्राणोंमें ही
जुह्वति = हवन करते हैं (इसप्रकार)
यज्ञक्षपितकल्मषाः = यज्ञोंद्वारा नाश होगयाहै पाप जिनका ऐसे
एते = यह
सर्वे = सब
अपि = ही (पुरुष)
यज्ञविदः = यज्ञोंकोजानने वाले हैं ॥

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोन्यःकुरुसत्तम

यज्ञशिष्टामृतभुजः, यान्ति, ब्रह्म, सनातनम्, न, अयम्, लोकः,अस्ति, अयज्ञस्य, कुतः, अन्यः, कुरुसत्तम ॥३१॥

और–

कुरुसत्तम = हे कुरुश्रेष्ठ अर्जुन
यज्ञशिष्टामृतभुजः = यज्ञोंके परिणामरूप ज्ञानामृतको भोगनेवाले योगीजन
सनातनम् = सनातन
ब्रह्म = परब्रह्म परमात्माको
यांति = प्राप्त होतेहैं
अयज्ञस्य = (और) यज्ञ रहित पुरुषको
अयम् = यह
लोकः = मनुष्यलोक (भी सुखदायक)
न = नहीं
अस्ति = है (फिर)
अन्यः = परलोक
कुतः = कैसे (सुखदायक होगा)

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे

एवम्, बहुविधाः, यज्ञाः, वितताः, ब्रह्मणः, मुखे, कर्मजान्, विद्धि, तान्, सर्वान्, एवम्, ज्ञात्वा, विमोक्ष्यसे ॥३२॥

एवम् = ऐसे
बहुविधाः = बहुतप्रकारके
यज्ञाः = यज्ञ
ब्रह्मणः = वेदकी
मुखे = वाणीमें
वितताः = विस्तार किये गये हैं
तान् = उन
सर्वान् = सबको
कर्मजान् = शरीर मन और इंद्रियोंकी क्रिया द्वाराही उत्पन्न होनेवाले
विद्धि = जान
एवम् = इस प्रकार तत्त्वसे
ज्ञात्वा = जानकर (निष्काम-कर्मयोग द्वारा)
विमोक्ष्यसे = संसार बंधनसे मुक्त होजायगा

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३

श्रेयान्, द्रव्यमयात्, यज्ञात्, ज्ञानयज्ञः, परंतप, सर्वम्, कर्म, अखिलम्, पार्थ, ज्ञाने, परिसमाप्यते ॥

और—

परंतप	=हे अर्जुन	सर्वम्	=संपूर्ण
द्रव्यमयात्	=सांसारिक वस्तुओंसे सिद्ध होनेवाले	अखिलम्	=यावन्मात्र
यज्ञात्	=यज्ञसे	कर्म	=कर्म
ज्ञानयज्ञः	=ज्ञानरूप यज्ञ (सबप्रकार)	ज्ञाने	=ज्ञानमें
श्रेयान्	=श्रेष्ठ है	परिसमाप्यते	=शेष होते हैं अर्थात् ज्ञान उनकी पराकाष्ठा है ॥
पार्थ	=(क्योंकि)हे पार्थ		

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ३४

तत्, विद्धि, प्रणिपातेन, परिप्रश्नेन, सेवया, उपदेक्ष्यंति, ते, ज्ञानम्, ज्ञानिनः, तत्त्वदर्शिनः ॥

इसलिये तत्त्वको जाननेवाले ज्ञानी पुरुषोंसे—

प्रणिपातेन	=भली प्रकार दंडवत्प्रणाम (तथा)	ते	=वे
सेवया	=सेवा (और)	तत्त्वदर्शिनः	=मर्मको जाननेवाले
परिप्रश्नेन	=निष्कपटभावसे किये हुए प्रश्न द्वारा	ज्ञानिनः	=ज्ञानीजन (तुझे)
तत्	=उस ज्ञानको	ज्ञानम्	=उस ज्ञानका
विद्धि	=जान	उपदेक्ष्यंति	=उपदेश करेंगे ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥

यत्, ज्ञात्वा, न, पुनः, मोहम्, एवम्, यास्यसि, पांडव, येन, भूतानि, अशेषेण, द्रक्ष्यसि, आत्मनि, अथो, मयि ३५

कि-

यत्	= जिसको
ज्ञात्वा	= जानकर (तूं)
पुनः	= फिर
एवम्	= इसप्रकार
मोहम्	= मोहको
न	= नहीं
यास्यसि	= प्राप्त होगा (और)
पांडव	= हे अर्जुन
येन	= जिस ज्ञानके द्वारा (सर्वव्यापी अनन्त चेतनरूप हुआ)
आत्मनि	= अपने*अन्तर्गत समष्टि बुद्धिके आधार
अशेषेण	= संपूर्ण
भूतानि	= भूतोंको
द्रक्ष्यसि	= देखेगा (और)
अथो	= उसके उपरान्त
मयि	= मेरेमें† अर्थात् सच्चिदानंद स्वरूपमें एकीभाव हुआ सच्चिदानंदमय ही देखेगा

* गीता अध्याय ६ श्लोक २९ में देखना चाहिये।

† गीता अध्याय ६ श्लोक ३० में देखना चाहिये।

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥३६॥

अपि, चेत्, असि, पापेभ्यः, सर्वेभ्यः, पापकृत्तमः, सर्वम्, ज्ञानप्लवेन, एव, वृजिनम्, संतरिष्यसि ॥

और—

चेत्	=यदि (तूं)	ज्ञान-प्लवेन	=ज्ञानरूप नौका द्वारा
सर्वेभ्यः	=सब	एव	=निःसंदेह
पापेभ्यः	=पापियोंसे	सर्वम्	=संपूर्ण
अपि	=भी	वृजिनम्	=पापोंको
पापकृत्तमः	=अधिक पाप करनेवाला	संतरि-ष्यसि	=अच्छी प्रकार तरजायगा ॥
असि	=है (तो भी)		

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

यथा, एधांसि, समिद्धः, अग्निः, भस्मसात्, कुरुते, अर्जुन, ज्ञानाग्निः, सर्वकर्माणि, भस्मसात्, कुरुते, तथा ॥३७॥

क्योंकि—

अर्जुन	=हे अर्जुन	एधांसि	=इन्धनको
यथा	=जैसे	भस्मसात्	=भस्ममय
समिद्धः	=प्रज्वलित	कुरुते	=कर देता है
अग्निः	=अग्नि	तथा	=वैसे ही

ज्ञानाग्निः	= ज्ञानरूपअग्नि	भस्मसात्	= भस्ममय
सर्वकर्माणि	= संपूर्ण कर्मोंको	कुरुते	= कर देताहै ॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥

न, हि, ज्ञानेन, सदृशम्, पवित्रम्, इह, विद्यते, तत्, स्वयम्, योगसंसिद्धः, कालेन, आत्मनि, विंदति ॥३८॥

इसलिये—

इह	= इससंसारमें	स्वयम्	= अपनेआप
ज्ञानेन	= ज्ञानके	योगसंसिद्धः	= समत्व बुद्धिरूप योगके द्वारा अच्छी प्रकार शुद्धान्तःकरण हुआ पुरुष
सदृशम्	= समान		
पवित्रम्	= पवित्र करने वाला		
हि	= निःसंदेह		
न	= (कुछ भी) नहीं		
विद्यते	= है	आत्मनि	= आत्मामें
तत्	= उस ज्ञानको	विंदति	= अनुभव करता है ॥
कालेन	= कितनेक कालसे		

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः ।
ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति

श्रद्धावान्, लभते, ज्ञानम्, तत्परः, संयतेन्द्रियः, ज्ञानम्, लब्ध्वा, पराम्, शांतिम्, अचिरेण, अधिगच्छति ॥३६॥

और हे अर्जुन—

संयतेन्द्रियः = जितेंद्रिय	लब्ध्वा = प्राप्त होकर
तत्परः = तत्पर हुआ	अचिरेण = तत्क्षण (भगवत् प्राप्ति रूप)
श्रद्धावान् = श्रद्धावान्पुरुष	पराम् = परम
ज्ञानम् = ज्ञानको	शान्तिम् = शांतिको
लभते = प्राप्त होताहै	अधिगच्छति = प्राप्त हो जाता है ॥
ज्ञानम् = ज्ञानको	

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः

अज्ञः, च, अश्रद्दधानः, च, संशयात्मा, विनश्यति, न, अयम्, लोकः, अस्ति, न, परः, न, सुखम्, संशयात्मनः ॥४०॥

और हे अर्जुन—

अज्ञः = भगवत् विषयको न जाननेवाला	संशयात्मा = संशय युक्त पुरुष
च = तथा	विनश्यति = परमार्थसे भ्रष्ट हो जाता है (उनमें भी)
अश्रद्दधानः = श्रद्धा रहित	संशयात्मनः = संशययुक्तपुरुषके लिये तो
च = और	

न	=न	परः	=परलोक
सुखम्	=सुख है (और)		
न	=न	अस्ति	=है अर्थात् यह लोक और परलोक दोनों ही उसके लिये भ्रष्ट होजाते हैं
अयम्	=यह		
लोकः	=लोक है		
न	=न		

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्।
आत्मवंतं न कर्माणि निबध्नंति धनंजय ४१

योगसंन्यस्तकर्माणम्, ज्ञानसंछिन्नसंशयम्, आत्मवंतम्, न, कर्माणि, निबध्नंति, धनंजय॥

और-

धनंजय	=हे धनंजय	ज्ञानसंछिन्नसंशयम्	=ज्ञान द्वारा नष्ट हो गये हैं सब संशय जिसके ऐसे
योगसंन्यस्तकर्माणम्	=समत्व बुद्धि रूपयोग द्वारा भगवत् अर्पण कर दियेहैं संपूर्ण कर्म जिसने (और)	आत्मवंतम्	=परमात्मपरायणपुरुषको
		कर्माणि	=कर्म
		न	=नहीं
		निबध्नन्ति	=बान्धते हैं॥

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥

तस्मात्, अज्ञानसंभूतम्, हृत्स्थम्, ज्ञानासिना, आत्मनः, छित्त्वा, एनम्, संशयम्, योगम्, आतिष्ठ, उत्तिष्ठ, भारत ॥४२॥

तस्मात्	=इससे	हृत्स्थम्	=हृदयमें स्थित
भारत	=हे भरतवंशी अर्जुन (तूं)	एनम्	=इस
		आत्मनः	=अपने
योगम्	=समत्वबुद्धि रूपयोगमें	संशयम्	=संशयको
आतिष्ठ	=स्थित हो (और)	ज्ञानासिना	=ज्ञानरूप तलवार द्वारा
		छित्त्वा	=छेदन करके (युद्धके लिये)
अज्ञानसंभूतं	=अज्ञानसे उत्पन्न हुये	उत्तिष्ठ	=खड़ा हो ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायाम् योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञान कर्मसंन्यास योगो-नाम चतुर्थोऽध्यायः ॥४॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्र विषयक श्रीकृष्ण और अर्जुनके संवादमें "ज्ञान कर्म संन्यासयोग" नामक चतुर्थ अध्याय।

हरि ॐ तत्सत् हरि ॐ तत्सत् हरि ॐ तत्सत्

ॐ

श्रीपरमात्मनेनमः

अथ पंचमोऽध्यायः ॥

अर्जुन उवाच

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१

संन्यासम्, कर्मणाम्, कृष्ण, पुनः, योगम्, च, शंससि,
यत्, श्रेयः, एतयोः, एकम्, तत्, मे, ब्रूहि, सुनिश्चितम् ॥

उसके उपरान्त अर्जुनने पूछा-

कृष्ण	=हे कृष्ण (आप)	एतयोः	=इन दोनोंमें
कर्मणाम्	=कर्मोंके	एकम्	=एक
संन्यासम्	=संन्यासकी	यत्	=जो
च	=और	सुनिश्चितम्	=निश्चय किया हुआ
पुनः	=फिर	श्रेयः	=कल्याणकारक
योगम्	=निष्काम कर्मयोगकी	तत्	=(होवे) उसको
शंससि	=प्रशंसा करते हो (इसलिये)	मे	=मेरेलिये
		ब्रूहि	=कहिये ॥

श्रीभगवानुवाच

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते

संन्यासः, कर्मयोगः, च, निःश्रेयसकरौ, उभौ, तयोः, तु, कर्मसंन्यासात्, कर्मयोगः, विशिष्यते ॥२॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्णमहाराज बोले हे अर्जुन–

संन्यासः	= कर्मोंका संन्यास*	तु	= परन्तु
च	= और	तयोः	= उन दोनोंमें भी
कर्मयोगः	= निष्काम कर्मयोग†	कर्मसंन्यासात्	= कर्मोंके संन्याससे
उभौ	= यह दोनों ही	कर्मयोगः	= निष्काम कर्मयोग (साधनमें सुगम होनेसे)
निःश्रेयसकरौ	= परमकल्याण के करनेवाले हैं	विशिष्यते	= श्रेष्ठ है ॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ३

ज्ञेयः, सः, नित्यसंन्यासी, यः, न, द्वेष्टि, न, कांक्षति, निर्द्वंद्वः, हि, महाबाहो, सुखम्, बंधात्, प्रमुच्यते ॥

इसलिये–

महाबाहो	= हे अर्जुन	द्वेष्टि	= द्वेष करता है (और)
यः	= जो पुरुष		
न	= न (किसीसे)	न	= न (किसीकी)

---

* अर्थात् मन इन्द्रिय और शरीर द्वारा होनेवाले संपूर्ण कर्मोंमें कर्तापनका त्याग।

† अर्थात् समत्व बुद्धिसे भगवत् अर्थ कर्मोंका करना।

कांक्षति	= आकांक्षा करता है	निर्द्वंद्वः	= रागद्वेषादि द्वंद्वोंसेरहित हुआ पुरुष
सः	= वह (निष्काम कर्मयोगी)	सुखम्	= सुख पूर्वक
नित्यसंन्यासी	= सदा संन्यासी ही	बन्धात्	= संसाररूप बन्धनसे
ज्ञेयः	= समझने योग्य है	प्रमुच्यते	= मुक्त हो जाता है ॥
हि	= क्योंकि		

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः
एकमप्यास्थितः सम्यगुभयोर्विंदते फलम् ४

सांख्ययोगौ, पृथक्, बालाः, प्रवदन्ति, न, पण्डिताः, एकम्, अपि, आस्थितः, सम्यक्, उभयोः, विन्दते, फलम् ॥

और हे अर्जुन–

सांख्य-योगौ	= (ऊपरकहेहुए) संन्यासऔर निष्काम कर्मयोगको	न	= नकि
बालाः	= मूर्खलोग	पंडिताः	= पंडितजन (क्योंकि दोनोंमेंसे)
पृथक्	= अलग अलग (फलवाले)	एकम्	= एकमें
प्रवदन्ति	= कहते हैं	अपि	= भी
		सम्यक्	= अच्छीप्रकार
		आस्थितः	= स्थित हुआ (पुरुष)

उभयोः	=दोनोंके	विन्दते	=प्राप्त होता है॥
फलम्	=फलरूप-परमात्माको		

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते
एकं सांख्यं च योगं च यः पश्यति स पश्यति

यत्, सांख्यैः, प्राप्यते, स्थानम्, तत्, योगैः, अपि, गम्यते, एकम्, सांख्यम्, च, योगम्, च, यः, पश्यति, सः, पश्यति ॥५॥

तथा-

सांख्यैः	=ज्ञानयोगियों द्वारा		(इसलिये)
		यः	=जो (पुरुष)
यत्	=जो	सांख्यम्	=ज्ञानयोग
स्थानम्	=परमधाम	च	=और
प्राप्यते	=प्राप्त किया जाता है	योगम्	=निष्काम कर्मयोगको
योगैः	=निष्काम कर्म योगियोंद्वारा		(फलरूपसे)
		एकम्	=एक
अपि	=भी	पश्यति	=देखता है
तत्	=वही	सः	=वह
गम्यते	=प्राप्त किया जाता है	च	=ही (यथार्थ)
		पश्यति	=देखता है॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति॥६॥

संन्यासः, तु, महाबाहो, दुःखम्, आप्तुम्, अयोगतः, योगयुक्तः, मुनिः, ब्रह्म, न, चिरेण, अधिगच्छति ॥

तु	= परन्तु	दुःखम्	= कठिन है (और)
महाबाहो	= हे अर्जुन	मुनिः	= भगवत् स्वरूपको मनन करनेवाला
अयोगतः	= निष्काम कर्म योगके विना	योगयुक्तः	= निष्काम कर्मयोगी
संन्यासः	= संन्यास अर्थात् मन इंद्रियां और शरीरद्वारा होनेवाले संपूर्ण कर्मोंमें कर्त्तापनका त्याग	ब्रह्म	= परब्रह्म परमात्माको
		न चिरेण	= शीघ्र ही
आप्तुम्	= प्राप्त होना	अधिगच्छति	= प्राप्त हो जाता है ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७

योगयुक्तः, विशुद्धात्मा, विजितात्मा, जितेन्द्रियः, सर्वभूतात्मभूतात्मा, कुर्वन्, अपि, न, लिप्यते ॥

तथा—

विजितात्मा	= वशमें किया हुआ है शरीर जिसके ऐसा	जितेंद्रियः	= जितेंद्रिय (और)
		विशुद्धात्मा	= विशुद्ध अन्तःकरणवाला

सर्व-भूतात्म-भूतात्मा	=	(एवं) संपूर्ण प्राणियोंके आत्मरूप परमात्मा में एकी भाव हुआ	योगयुक्तः	= निष्काम कर्मयोगी
			कुर्वन्	= कर्म करता हुआ
			अपि	= भी
			न लिप्यते	= लिपायमान् नहीं होता ॥

नैव किंचित्करोमीति
युक्तो मन्येत तत्त्ववित् ।
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्
नश्नन्गच्छन्स्वपञ्छ्वसन् ॥८॥

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥९॥

न, एव, किंचित्, करोमि, इति, युक्तः, मन्येत, तत्त्ववित्, पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्, प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्, अपि, इंद्रियाणि, इंद्रियार्थेषु, वर्तंते, इति, धारयन् ॥

और हे अर्जुन–

तत्त्ववित्	=	तत्त्वको जाननेवाला
युक्तः	=	सांख्ययोगी तो
पश्यन्	=	देखता हुआ
शृण्वन्	=	सुनता हुआ
स्पृशन्	=	स्पर्श करता हुआ
जिघ्रन्	=	सूंघता हुआ

अश्नन्	= भोजन करता हुआ	अपि	= भी
गच्छन्	= गमन करता हुआ	इंद्रियाणि	= सब इन्द्रियां
स्वपन्	= सोता हुआ	इन्द्रियार्थेषु	= अपने अपने अर्थोंमें
श्वसन्	= श्वासलेताहुआ	वर्तंते	= वर्त रही है
प्रलपन्	= बोलता हुआ	इति	= इस प्रकार
विसृजन्	= त्यागता हुआ	धारयन्	= समझताहुआ
गृह्णन्	= ग्रहण करता हुआ (तथा)	एव	= निःसन्देह
उन्मिषन्	= आंखोंको खोलता और	इति	= ऐसे
निमिषन्	= मीचता हुआ	मन्येत	= माने कि
		किंचित्	= (मैं) कुछ भी
		न	= नहीं
		करोमि	= करता हूं ॥

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥१०

ब्रह्मणि, आधाय, कर्माणि, संगम्, त्यक्त्वा, करोति, यः, लिप्यते, न, सः, पापेन, पद्मपत्रं, इव, अंभसा ॥

परन्तु हे अर्जुन देहाभिमानियों द्वारा यह साधन होना कठिन है और निष्काम कर्म योग सुगम है क्यों कि

यः	= जो पुरुष	आधाय	= अर्पणकरके (और)
कर्माणि	= सब कर्मोंको	संगम्	= आसक्तिको
ब्रह्मणि	= परमात्मामें		

त्यक्त्वा	=त्यागकर	इव	=सदृश
करोति	=कर्म करता है	पापेन	=पापसे
सः	=वह पुरुष	न लिप्यते	=लिपायमान नहीं होता ॥
अम्भसा	=जलसे		
पद्मपत्रम्	=कमलके पत्तेकी		

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ।
योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये॥

कायेन, मनसा, बुद्ध्या, केवलैः, इन्द्रियैः, अपि, योगिनः, कर्म, कुर्वंति, संगम्, त्यक्त्वा, आत्मशुद्धये ॥ ११ ॥

इसलिये—

योगिनः	=निष्काम कर्मयोगी (ममत्व बुद्धि रहित)	कायेन	=शरीर द्वारा
		अपि	=भी
		संगम्	=आसक्तिको
		त्यक्त्वा	=त्यागकर
केवलैः	=केवल	आत्मशुद्धये	=अन्तःकरणकी शुद्धिके लिये
इन्द्रियैः	=इन्द्रिय		
मनसा	=मन	कर्म	=कर्म
बुद्ध्या	=बुद्धि (और)	कुर्वंति	=करते हैं ॥

युक्तःकर्मफलंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीम्
अयुक्तः कामकारेण फले सक्तो निबध्यते १२

युक्तः, कर्मफलम्, त्यक्त्वा, शांतिम्, आप्नोति, नैष्ठिकीम्, अयुक्तः, कामकारेण, फले, सक्तः, निबध्यते ॥

इसीसे—

युक्तः = निष्काम कर्मयोगी	आप्नोति = प्राप्त होता है (और)
कर्मफलम् = कर्मोंके फलको	अयुक्तः = सकामी पुरुष
त्यक्त्वा = परमेश्वरके अर्पणकरके	फले = फलमें
	सक्तः = आसक्त हुआ
नैष्ठिकीम् = भगवत् प्राप्ति रूप	कामकारेण = कामनाके द्वारा
शान्तिम् = शान्तिको	निबध्यते = बंधता है

इसलिये निष्काम कर्मयोग उत्तम है ।

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

सर्वकर्माणि, मनसा, संन्यस्य, आस्ते, सुखम्, वशी, नवद्वारे, पुरे, देही, न, एव, कुर्वन्, न, कारयन् ॥

और हे अर्जुन—

वशी = वशमें है अन्तः-करण जिसके ऐसा सांख्ययोगका आचरण करनेवाला	कुर्वन् = करता हुआ
	न = (और) न
	कारयन् = करवाता हुआ
	नवद्वारे = नवद्वारोंवाले
देही = पुरुष तो	पुरे = शरीररूप घरमें
एव = निःसन्देह	सर्वकर्माणि = सब कर्मों को
न = न	

मनसा = मनसे	सुखम् = आनन्दपूर्वक (सच्चिदानन्दघन परमात्माके स्वरूपमें)
संन्यस्य = त्यागकर अर्थात् इंद्रियां इंद्रियोंके अर्थोंमें वर्तती हैं ऐसे मानता हुआ	आस्ते = स्थित रहता है ॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥

न, कर्तृत्वम्, न, कर्माणि, लोकस्य, सृजति, प्रभुः, न, कर्मफलसंयोगम्, स्वभावः, तु, प्रवर्तते ॥

और–

प्रभुः = परमेश्वर भी	(वास्तवमें)
लोकस्य = भूतप्राणियोंके	सृजति = रचता है
न = न	तु = किन्तु (परमात्माके सकाशसे)
कर्तृत्वम् = कर्त्तापनको	स्वभावः = प्रकृति (ही)
न = (और) न	प्रवर्तते = वर्तती है अर्थात् गुण ही गुणोंमें वर्त रहे हैं ॥
कर्माणि = कर्मोंको (तथा)	
न = न	
कर्मफलसंयोगम् = कर्मोंके फलके संयोगको	

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः॥१५॥

न, आदत्ते, कस्यचित्, पापम्, न, च, एव, सुकृतम्, विभुः, अज्ञानेन, आवृतम्, ज्ञानम्, तेन, मुह्यंति, जंतवः ॥

और—

विभुः	= सर्वव्यापी परमात्मा	आदत्ते	= ग्रहण करता है (किन्तु)
न	= न	अज्ञानेन	= मायाके द्वारा
कस्यचित्	= किसीके	ज्ञानम्	= ज्ञान
पापम्	= पापकर्मको	आवृतम्	= ढका हुआ है
च	= और	तेन	= इससे
न	= न (किसीके)	जन्तवः	= सब जीव
सुकृतम्	= शुभकर्मको	मुह्यन्ति	= मोहित हो रहे हैं ॥
एव	= भी		

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् १६

ज्ञानेन, तु, तत्, अज्ञानम्, येषाम्, नाशितम्, आत्मनः, तेषाम्, आदित्यवत्, ज्ञानम्, प्रकाशयति, तत्परम् ॥

तु	= परन्तु	तेषाम्	= उनका
येषाम्	= जिनका	ज्ञानम्	= (वह) ज्ञान
तत्	= वह	आदित्यवत्	= सूर्यके सदृश
आत्मनः	= अन्तःकरणका		
अज्ञानम्	= अज्ञान		
ज्ञानेन	= आत्मज्ञान द्वारा	तत्परम्	= उस सच्चिदानंदघन परमात्माको
नाशितम्	= नाश होगया है	प्रकाशयति	= प्रकाशता है*

* अर्थात् परमात्माके स्वरूपको साक्षात् कराता है।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७

तद्बुद्धयः, तदात्मानः, तन्निष्ठाः, तत्परायणाः, गच्छन्ति, अपुनरावृत्तिम्, ज्ञाननिर्धूतकल्मषाः ॥

और हे अर्जुन-

तद्बुद्धयः	= तद्रूप है बुद्धि जिनकी (तथा)	तत्परायणाः	= तत्परायण पुरुष
तदात्मानः	= तद्रूप है मन जिनका (और)	ज्ञाननिर्धूतकल्मषाः	= ज्ञानके द्वारा पाप रहित हुए
तन्निष्ठाः	= उस सच्चिदानंदघन परमात्मामें ही है निरंतर एकी भावसे स्थिति जिनकी ऐसे	अपुनरावृत्तिम्	= अपुनरावृत्ति-को अर्थात् परमगतिको
		गच्छन्ति	= प्राप्त होते हैं ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पंडिताः समदर्शिनः १८

विद्याविनयसंपन्ने, ब्राह्मणे, गवि, हस्तिनि, शुनि, च, एव, श्वपाके, च, पण्डिताः, समदर्शिनः ॥

ऐसे वे-

पंडिताः	= ज्ञानीजन	विद्याविनयसंपन्ने	= विद्या और विनययुक्त

ब्राह्मणे	=ब्राह्मणमें	श्वपाके	=चाण्डालमें
च	=तथा	च	=भी
गवि	=गौ	समद्-र्शिनः	=समभावसे* देखनेवाले
हस्तिनि	=हाथी		
शुनि	=कुत्ते (और)	एव	=ही (होते हैं) ॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥

इह, एव, तैः, जितः, सर्गः, येषाम्, साम्ये, स्थितम्, मनः, निर्दोषम्, हि, समम्, ब्रह्म, तस्मात्, ब्रह्मणि, ते, स्थिताः ॥१६॥

इसलिये—

येषाम्	=जिनका	हि	=क्योंकि
मनः	=मन	ब्रह्म	=सच्चिदानंद-घन परमात्मा
साम्ये	=समत्वभावमें		
स्थितम्	=स्थित है	निर्दोषम्	=निर्दोष (और)
तैः	=उनके द्वारा	समम्	=सम है
इह	=इस जीवित अवस्थामें	तस्मात्	=इससे
		ते	=वे
एव	=ही	ब्रह्मणि	=सच्चिदानंद-घन परमात्मामें ही
सर्गः	= संपूर्ण संसार		
जितः	=जीत लिया गया†	स्थिताः	=स्थित हैं ॥

* इसका विस्तार गी० अ० ६ श्लोक ३२की टिप्पणीमें देखना चाहिये ।

† अर्थात् वे जीते हुये ही संसारसे मुक्त हैं ।

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः॥२०॥

न, प्रहृष्येत्, प्रियम्, प्राप्य, न, उद्विजेत्, प्राप्य, च, अप्रियम्, स्थिरबुद्धिः, असंमूढः, ब्रह्मवित्, ब्रह्मणि, स्थितः॥

और जो पुरुष—

प्रियम्	= प्रियको अर्थात् जिसको लोग प्रिय समझते हैं उसको	प्राप्य	= प्राप्त होकर
प्राप्य	= प्राप्त होकर	न उद्विजेत्	= उद्वेगवान् न हो (ऐसा)
न प्रहृष्येत्	= हर्षित नहीं हो	स्थिरबुद्धिः	= स्थिर बुद्धि
च	= और	असंमूढः	= संशय रहित
अप्रियम्	= अप्रियको अर्थात् जिसको लोग अप्रिय समझते हैं उसको	ब्रह्मवित्	= ब्रह्मवेत्ता पुरुष
		ब्रह्मणि	= सच्चिदानंदघन परब्रह्म परमात्मामें
		स्थितः	= एकीभावसे नित्य स्थित है

बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥२१॥

बाह्यस्पर्शेषु, असक्तात्मा, विन्दति, आत्मनि, यत्, सुखम्, सः, ब्रह्मयोगयुक्तात्मा, सुखम्, अक्षयम्, अश्नुते॥

और-

बाह्यस्पर्शेषु	=	बाहरके विषयोंमें अर्थात् सांसारिक भोगोंमें	(तत्)	=	उसको
			विंदति	=	प्राप्त होता है
			सः	=	(और) वह पुरुष
असक्तात्मा	=	आसक्तिरहित अन्तःकरणवाला पुरुष	ब्रह्मयोगयुक्तात्मा	=	सच्चिदानंदघन परब्रह्म परमात्मा रूप योगमें एकीभावसे स्थित हुआ
आत्मनि	=	अंतःकरणमें			
यत्	=	जो	अक्षयम्	=	अक्षय
सुखम्	=	भगवत् ध्यान जनित आनन्द है	सुखम्	=	आनन्दको
			अश्नुते	=	अनुभव करता है ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥२२॥

ये, हि, संस्पर्शजाः, भोगाः, दुःखयोनयः, एव, ते, आद्यंतवंतः, कौन्तेय, न, तेषु, रमते, बुधः ॥

और-

ये	=	जो (यह)	संस्पर्शजाः	=	इंद्रिय तथा विषयोंके संयोगसे उत्पन्न होनेवाले

भोगाः	=सब भोग हैं	आद्यंत-वंतः	=आदि अन्त वाले अर्थात् अनित्य हैं (इसलिये)
ते	=वे (यद्यपि विषयी पुरुषोंको सुखरूप भासते हैं तोभी)	कौंतेय	=हे अर्जुन
हि	=निःसंदेह	बुधः	=बुद्धिमान् विवेकी पुरुष
दुःखयोनयः एव	=दुःखकेही हेतु हैं (और)	तेषु	=उनमें
		न	=नहीं
		रमते	=रमता ॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः २३

शक्नोति, इह, एव, यः, सोढुम्, प्राक्, शरीरविमोक्षणात्, कामक्रोधोद्भवम्, वेगम्, सः, युक्तः, सः, सुखी, नरः ॥

यः	=जो मनुष्य	वेगम्	=वेगको
शरीरविमोक्षणात्	=शरीरके नाश होनेसे	सोढुम्	=सहन करनेमें
प्राक्	=पहिले	शक्नोति	=समर्थ है अर्थात् काम क्रोधको जिसने सदाके लिये जीत लिया है
एव	=ही		
कामक्रोधोद्भवम्	=काम और क्रोधसे उत्पन्न हुए	सः	=वह

नरः	=मनुष्य		(और)
इह	=इस लोकमें	सः	=वही
युक्तः	=योगी है	सुखी	=सुखी है ॥

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति २४

यः, अन्तःसुखः, अन्तरारामः, तथा, अन्तर्ज्योतिः, एव, यः, सः, योगी, ब्रह्मनिर्वाणम्, ब्रह्मभूतः, अधिगच्छति ॥

यः	=जो पुरुष	सः	=(ऐसा) वह
एव	=निश्चय करके	ब्रह्मभूतः	=सच्चिदानंदघन परब्रह्म परमात्माके साथ एकीभाव हुआ
अन्तःसुखः	=अन्तर आत्मामें ही सुखवाला है (और)	योगी	= सांख्ययोगी
अन्तरारामः	=आत्मामेंही आरामवाला है	ब्रह्मनिर्वाणम्	=शान्त ब्रह्मको
तथा	=तथा	अधिगच्छति	=प्राप्त होता है ॥
यः	=जो		
अन्तर्ज्योतिः	=आत्मामें ही ज्ञानवाला है।		

लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः २५

लभंते, ब्रह्मनिर्वाणम्, ऋषयः, क्षीणकल्मषाः, छिन्नद्वैधाः, यतात्मानः, सर्वभूतहिते, रताः ॥

और—

क्षीणक-ल्मषाः	=	नाश होगये हैं सब पाप जिनके (तथा)	यतात्मानः	=	एकाग्र हुआ है भगवान्‌के ध्यानमें चित्त जिनका (ऐसे)
छिन्न-द्वैधाः	=	ज्ञानकरके निवृत्त होगया है संशय जिनका	ऋषयः	=	ब्रह्मवेत्ता पुरुष
सर्वभूत-हितेरताः	=	(और) संपूर्णभूत प्राणियोंके हितमें है रति जिनकी	ब्रह्मनि-र्वाणम्	=	शान्त परब्रह्मको
			लभंते	=	प्राप्त होते हैं ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥

कामक्रोधवियुक्तानाम्, यतीनाम्, यतचेतसाम्, अभितः, ब्रह्मनिर्वाणम्, वर्तते, विदितात्मनाम् ॥२६॥

और—

कामक्रोधवियुक्तानाम्	=	काम क्रोध से रहित	विदितात्मनाम्	=	परब्रह्म परमात्माका साक्षात्कार किये हुये
यतचेतसाम्	=	जीते हुए चित्तवाले			

यतीनाम्	= ज्ञानी पुरुषों के लिए	ब्रह्मनिर्वाणम्	= शान्त परब्रह्म परमात्मा ही
अभितः	= सब ओरसे	वर्तते	= प्राप्त है ॥

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ॥

स्पर्शान्, कृत्वा, बहिः, बाह्यान्, चक्षुः, च, एव, अन्तरे, भ्रुवोः, प्राणापानौ, समौ, कृत्वा, नासाभ्यन्तर-चारिणौ ॥२७॥

और हे अर्जुन—

बाह्यान्	= बाहरके	भ्रुवोः	= भृकुटीके
स्पर्शान्	= विषयभोगोंको (न चिंतन करता हुआ)	अन्तरे	= बीचमें (स्थित करके तथा)
बहिः	= बाहर	नासाभ्यन्तरचारिणौ	= नासिकामें विचरने वाले
एव	= ही	प्राणापानौ	= प्राण और अपानवायुको
कृत्वा	= त्यागकर	समौ	= सम
च	= और	कृत्वा	= करके
चक्षुः	= नेत्रोंकी दृष्टिको		

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥

यतेन्द्रियमनोबुद्धिः, मुनिः, मोक्षपरायणः, विगतेच्छाभयक्रोधः, यः, सदा, मुक्तः, एव, सः ॥२८॥

यतेंद्रियमनोबुद्धिः	= जीती हुई है इंद्रियां मन और बुद्धि जिसकी ऐसा	विगतेच्छाभयक्रोधः	= इच्छा भय और क्रोधसे रहित है
		सः	= वह
यः	= जो	सदा	= सदा
मोक्षपरायणः	= मोक्ष परायण	मुक्तः	= मुक्त
मुनिः	= मुनि*	एव	= ही है ॥

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥

भोक्तारम्, यज्ञतपसाम्, सर्वलोकमहेश्वरम्, सुहृदम्, सर्वभूतानाम्, ज्ञात्वा, माम्, शान्तिम्, ऋच्छति ॥२९॥

और हे अर्जुन मेरा भक्त-

माम्	= मेरेको		(और)
यज्ञतपसाम्	= यज्ञ और तपोंका	सर्वलोकमहेश्वरम्	= संपूर्ण लोकों के ईश्वरोंका भी ईश्वर
भोक्तारम्	= भोगनेवाला		

---

* परमेश्वरके स्वरूपका निरन्तर मनन करनेवाला

(तथा)		(ऐसा)
सर्वभूतानाम्	= संपूर्ण भूत प्राणियोंका	ज्ञात्वा = तत्त्वसे जानकर
सुहृदम्	= सुहृद् अर्थात् स्वार्थ रहित प्रेमी	शान्तिम् = शान्तिको
		ऋच्छति = प्राप्त होता है

और सच्चिदानन्दघन परिपूर्ण शान्त ब्रह्मके सिवाय उसकी दृष्टिमें और कुछ भी नहीं रहता केवल वासुदेव ही वासुदेव रह जाता है ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायाम् योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यास योगो नाम पञ्चमोऽध्यायः ॥५॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्र विषयक श्रीकृष्ण और अर्जुनके संवादमें "कर्म संन्यासयोग" नामक पंचम अध्याय।

हरि ॐ तत्सत् हरि ॐ तत्सत् हरि ॐ तत्सत्

ॐ

श्रीपरमात्मनेनमः

अथ षष्ठोऽध्यायः ॥

श्रीभगवानुवाच

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥

अनाश्रितः, कर्मफलम्, कार्यम्, कर्म, करोति, यः, सः, संन्यासी, च, योगी, च, न, निरग्निः, न, च, अक्रियः ॥१॥

उसके उपरान्त श्रीकृष्णमहाराज बोले हे अर्जुन—

यः	=जो पुरुष
कर्मफलम्	=कर्मके फलको
अनाश्रितः	=न चाहताहुआ
कार्यम्	=करने योग्य
कर्म	=कर्म
करोति	=करता है
सः	=वह
संन्यासी	=संन्यासी
च	=और
योगी	=योगी है
च	=और (केवल)
निरग्निः	=अग्निको त्यागनेवाला (संन्यासी योगी)
न	=नहीं है
च	=तथा (केवल)
अक्रियः	=क्रियाओंको त्यागनेवाला (भी संन्यासी योगी)
न	=नहीं है ॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन॥

यम्, संन्यासम्, इति, प्राहुः, योगम्, तम्, विद्धि, पांडव, न, हि, असंन्यस्तसंकल्पः, योगी, भवति, कश्चन ॥२॥

इसलिये–

पांडव	=हे अर्जुन	हि	=क्योंकि
यम्	= जिसको	असंन्यस्त-संकल्पः	= संकल्पोंकोन त्यागनेवाला
संन्यासम्	=संन्यास*	कश्चन	=कोई भी पुरुष
इति	=ऐसा	योगी	=योगी
प्राहुः	=कहते हैं	न	=नहीं
तम्	=उसीको (तूं)	भवति	=होता ॥
योगम्	=योग†		
विद्धि	=जान		

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते॥३

आरुरुक्षोः, मुनेः, योगम्, कर्म, कारणम्, उच्यते, योगारूढस्य, तस्य, एव, शमः, कारणम्, उच्यते ॥

और–

योगम्	= समत्व बुद्धि रूप योगमें	मुनेः	= मननशील पुरुषके लिये (योगकी प्राप्तिमें)
आरुरुक्षोः	= आरूढहोने कीइच्छावाले		

*—† गी॰अ॰२ श्लोक ३की टिप्पणीमें इसका खुलासा अर्थ लिखा है।

कर्म	= निष्काम भावसे कर्म करना ही	योगा-रूढस्य	= योगारूढ पुरुषके लिये
कारणम्	= हेतु	शमः	= सर्व संकल्पों का अभाव
उच्यते	= कहाहै(और योगा रूढ हो जानेपर)	एव	= ही(कल्याणमें)
		कारणम्	= हेतु
तस्य	= उस	उच्यते	= कहा है ॥

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते॥४

यदा, हि, न, इन्द्रियार्थेषु, न, कर्मसु, अनुषज्जते, सर्वसंकल्पसंन्यासी, योगारूढः, तदा, उच्यते ॥

और-

यदा	= जिस कालमें	हि	= ही
न	= न (तो)	अनुष-ज्जते	= आसक्त होता है
इन्द्रिया-र्थेषु	= इन्द्रियोंके भोगोंमें	तदा	= उस कालमें
(अनुष-ज्जते)	= आसक्त होता है (तथा)	सर्वसंकल्प संन्यासी	= सर्व संक-ल्पोंका त्या-गी पुरुष
न	= न	योगारूढः	= योगारूढ
कर्मसु	= कर्मोंमें	उच्यते	= कहाजाताहै ॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥५

उद्धरेत्, आत्मना, आत्मानम्, न, आत्मानम्, अवसादयेत्, आत्मा, एव, हि, आत्मनः, बन्धुः, आत्मा, एव, रिपुः, आत्मनः ॥

और यह योगारूढता कल्याणमें हेतु कही है इसलिये मनुष्यको चाहिये कि–

आत्मना	=अपने द्वारा	हि	=क्योंकि (यह)
आत्मानम्	=आपका(संसार समुद्रसे)	आत्मा	=जीवात्मा आप
		एव	=ही (तो)
उद्धरेत्	=उद्धार करे (और)	आत्मनः	=अपना
		बन्धुः	=मित्र है (और)
आत्मानम्	=अपने आत्माको	आत्मा	=आप
		एव	=ही
न अवसादयेत्	=अधोगतिमें न पहुंचावे	आत्मनः	=अपना
		रिपुः	=शत्रु है

अर्थात् और कोई दूसरा शत्रु या मित्र नहीं है ॥

बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६

बन्धुः, आत्मा, आत्मनः, तस्य, येन, आत्मा, एव, आत्मना, जितः, अनात्मनः, तु, शत्रुत्वे, वर्तेत, आत्मा, एव, शत्रुवत् ॥

तस्य	=उस	आत्मा	=(वह) आप
आत्मनः	=जीवात्माका तो	एव	=ही

बन्धुः = मित्र है (कि)
येन = जिस
आत्मना = जीवात्मा द्वारा
आत्मा = मन और इंद्रियों सहित शरीर
जितः = जीता हुआ है
तु = और
अनात्मनः = जिसके द्वारा मन और इंद्रियोंसहित शरीर नहीं जीता गया है उसका
आत्मा = (वह) आप
एव = ही
शत्रुवत् = शत्रुके सदृश
शत्रुत्वे = शत्रुतामें
वर्तेत = वर्तता है ॥

जितात्मनः प्रशांतस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥७

जितात्मनः, प्रशान्तस्य, परमात्मा, समाहितः, शीतोष्ण-सुखदुःखेषु, तथा, मानापमानयोः ॥

और हे अर्जुन–

शीतोष्ण-सुख-दुःखेषु = सर्दी गर्मी और सुखदुः-खादिकोंमें
तथा = तथा
मानापमानयोः = मान और अपमानमें
प्रशान्तस्य = जिसके अन्तः-करणकी वृत्तियां अच्छी प्रकार शांत हैं अर्थात् विकार रहित हैं (ऐसे)

जितात्मनः	=	स्वाधीन आत्मावाले पुरुषके	समाहितः	=	सम्यक् प्रकारसे स्थित है अर्थात् उसके ज्ञानमें परमात्माके सिवाय अन्य कुछ है ही नहीं ॥
		(ज्ञानमें)			
परमात्मा	=	सच्चिदानंदघन परमात्मा			

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः॥८

ज्ञानविज्ञानतृप्तात्मा, कूटस्थः, विजितेन्द्रियः, युक्तः, इति, उच्यते, योगी, समलोष्टाश्मकांचनः ॥

और—

ज्ञानविज्ञानतृप्तात्मा	=	ज्ञानविज्ञानसे तृप्त है अन्तःकरण जिसका			(तथा)
		(तथा)	समलोष्टाश्मकांचनः	=	समान है मिट्टी पत्थर और सुवर्ण जिसके (वह)
कूटस्थः	=	विकार रहित है स्थिति जिसकी (और)	योगी	=	योगी
विजितेंद्रियः	=	अच्छी प्रकार जीती हुई हैं इंद्रियां जिसकी	युक्तः	=	युक्त अर्थात् भगवत्‌की प्राप्तिवाला है
			इति	=	ऐसे
			उच्यते	=	कहा जाता है ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु, साधुषु, अपि, च, पापेषु, समबुद्धिः, विशिष्यते ॥

और जो पुरुष–

सुहृद्-	=सुहृद्*	च	=और
मित्र-	=मित्र	पापेषु	=पापियोंमें
अरि-	=वैरी	अपि	=भी
उदासीन-	=उदासीन†	समबुद्धिः	=समान भाववाला है (वह)
मध्यस्थ-	=मध्यस्थ‡		
द्वेष्य-	=द्वेषी और		
बन्धुषु	=बन्धुगणोंमें (तथा)	विशिष्यते	=अति श्रेष्ठ है ॥
साधुषु	=धर्मात्माओंमें		

योगी युंजीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥१०

योगी, युंजीत, सततम्, आत्मानम्, रहसि, स्थितः, एकाकी, यतचित्तात्मा, निराशीः, अपरिग्रहः ॥

* स्वार्थ रहित सबका हित करनेवाले

† पक्षपात रहित

‡ दोनों ओरकी भलाई चाहनेवाले

इसलिये उचित है कि-

यतचित्तात्मा	= जिसका मन और इंद्रियों सहित शरीर जीता हुआ है ऐसा	एकाकी	= अकेला ही
		रहसि	= एकान्त स्थानमें
		स्थितः	= स्थित हुआ
		सततम्	= निरन्तर
निराशीः	= वासना रहित (और)	आत्मानम्	= आत्माको
अपरिग्रहः	= संग्रह रहित	युंजीत	= (परमेश्वरके ध्यानमें) लगावे ॥
योगी	= योगी		

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्

शुचौ, देशे, प्रतिष्ठाप्य, स्थिरम्, आसनम्, आत्मनः, न, अत्युच्छ्रितम्, न, अतिनीचम्, चैलाजिनकुशोत्तरम् ॥ ११ ॥

कैसे कि-

शुचौ	= शुद्ध	न	= न
देशे	= भूमिमें	अति-उच्छ्रितम्	= अति ऊंचा (और)
चैलाजिन-कुशोत्तरम्	= कुशा मृगछाला और वस्त्र हैं उपरोपरि जिसके ऐसे	न	= न
		अतिनीचम्	= अति नीचा
		स्थिरम्	= स्थिर
आत्मनः	= अपने	प्रतिष्ठाप्य	= स्थापन करके
आसनम्	= आसनको		

तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ।
उपविश्यासने युंज्याद्योगमात्मविशुद्धये १२

तत्र, एकाग्रम्, मनः, कृत्वा, यतचित्तेंद्रियक्रियः, उपविश्य, आसने, युंज्यात्, योगम्, आत्मविशुद्धये ॥

और-

तत्र	=उस	यतचित्तेंद्रियक्रियः	=	चित्त और इंद्रियोंकी क्रियाओंको वशमें किया हुआ
आसने	=आसनपर	आत्मविशुद्धये	=	अन्तःकरणकी शुद्धिके लिये
उपविश्य	=बैठकर (तथा)	योगम्	=	योगका
मनः	=मनको	युंज्यात्	=	अभ्यासकरे ॥
एकाग्रम्	=एकाग्र			
कृत्वा	=करके			

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥

समम्, कायशिरोग्रीवम्, धारयन्, अचलम्, स्थिरः, संप्रेक्ष्य, नासिकाग्रम्, स्वम्, दिशः, च, अनवलोकयन् ॥ १३

उसकी विधि इस प्रकार है कि-

कायशिरोग्रीवम्	=काया शिर और ग्रीवाको	समम्	=समान
		च	=और

अचलम् = अचल	संप्रेक्ष्य = देखकर
धारयन् = धारण किये हुए	दिशः = अन्य दिशाओंको
स्थिरः = दृढ़ (होकर)	अनवलोकयन् = न देखता हुआ ॥
स्वम् = अपने	
नासिकाग्रम् = नासिकाके अग्रभागको	

प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥

प्रशांतात्मा, विगतभीः, ब्रह्मचारिव्रते, स्थितः, मनः, संयम्य, मच्चित्तः, युक्तः, आसीत, मत्परः ॥१४॥

और–

ब्रह्मचारिव्रते = ब्रह्मचर्यके व्रतमें	युक्तः = सावधान (होकर)
स्थितः = स्थित रहता हुआ	मनः = मनको
विगतभीः = भयरहित (तथा)	संयम्य = वशमें करके
प्रशांतात्मा = अच्छी प्रकार शान्त अन्तःकरणवाला (और)	मच्चित्तः = मेरेमें लगेहुए चित्तवाला (और)
	मत्परः = मेरे परायण हुआ
	आसीत = स्थित होवे ॥

युंजन्नेवं सदात्मानं योगी नियतमानसः ।
शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥

युंजन्, एवम्, सदा, आत्मानम्, योगी, नियतमानसः, शांतिम्, निर्वाणपरमाम्, मत्संस्थाम्, अधिगच्छति ॥१५॥

एवम्	= इस प्रकार		मत्संस्थाम्	= मेरेमें स्थिति रूप
आत्मानम्	= आत्माको		निर्वाणपरमाम्	= परमानन्द पराकाष्ठा-वाली
सदा	= निरन्तर (परमेश्वरके-स्वरूपमें)		शान्तिम्	= शान्तिको
युंजन्	= लगाता हुआ		अधिगच्छति	= प्राप्त होता है ॥
नियतमानसः	= स्वाधीन मनवाला			
योगी	= योगी			

नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥

न, अति, अश्नतः, तु, योगः, अस्ति, न, च, एकांतम्, अनश्नतः, न, च, अति, स्वप्नशीलस्य, जाग्रतः, न, एव, च, अर्जुन ॥१६॥

परन्तु—

अर्जुन	= हे अर्जुन		योगः	= यह योग

न	=न	न	=न
तु	=तो	अति	=अति
अति	=बहुत	स्वप्नशीलस्य	={शयन करनेके स्वभाववालेका
अश्नतः	=खानेवालेका	च	=और
अस्ति	=सिद्ध होता है	न	=न
च	=और	जाग्रतः	={अत्यन्त जागनेवालेका
न	=न	एव	=ही
एकान्तम्	=बिल्कुल		(सिद्ध होता है)
अनश्नतः	=न खानेवालेका		
च	=तथा		

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

युक्ताहारविहारस्य, युक्तचेष्टस्य, कर्मसु, युक्तस्वप्नावबोधस्य, योगः, भवति, दुःखहा ॥

यह—

दुःखहा	={दुःखोंका नाश करनेवाला	युक्तचेष्टस्य	={यथायोग्य चेष्टा करने वालेका (और)
योगः	=योग (तो)		
युक्ताहारविहारस्य	={यथायोग्य आहार और विहार करनेवालेका (तथा)	युक्तस्वप्नावबोधस्य	={यथायोग्य शयन करने तथा जागनेवालेका ही
कर्मसु	=कर्मोंमें	भवति	=(सिद्ध) होता है

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥

यदा, विनियतम्, चित्तम्, आत्मनि, एव, अवतिष्ठते, निःस्पृहः, सर्वकामेभ्यः, युक्तः, इति, उच्यते, तदा ॥१८॥

इस प्रकार योगके अभ्याससे—

विनियतम्	= अत्यन्त वश में किया हुआ	तदा	= उस कालमें
चित्तम्	= चित्त	सर्वकामेभ्यः	= संपूर्ण कामनाओंसे
यदा	= जिस कालमें	निःस्पृहः	= स्पृहा रहित हुआ पुरुष
आत्मनि	= परमात्मामें		
एव	= ही	युक्तः	= योगयुक्त
अवतिष्ठते	= भली प्रकार स्थित हो जाता है	इति	= ऐसा
		उच्यते	= कहा जाता है ॥

यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ।
योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥

यथा, दीपः, निवातस्थः, न, इंगते, सा, उपमा, स्मृता, योगिनः, यतचित्तस्य, युंजतः, योगम्, आत्मनः ॥१९॥

और—

यथा	= जिस प्रकार	दीपः	= दीपक
निवातस्थः	= वायुरहित स्थानमें स्थित	न	= नहीं

इंगते	= चलायमान होता है	योगम् युंजतः	= ध्यानमें लगे हुये
सा	= वैसी ही	योगिनः	= योगीके
उपमा	= उपमा	यतचित्तस्य	= जीते हुये चित्तकी
आत्मनः	= परमात्माके	स्मृता	= कही गईहै ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

यत्र, उपरमते, चित्तम्, निरुद्धम्, योगसेवया, यत्र, च, एव, आत्मना, आत्मानम्, पश्यन्, आत्मनि, तुष्यति ॥२०॥

और हे अर्जुन–

यत्र	= जिसअवस्थामें	आत्मना	= शुद्ध हुई सूक्ष्मबुद्धिद्वारा
योगसेवया	= योगके अभ्यासखे	आत्मानम्	= परमात्माको
निरुद्धम्	= निरुद्ध हुआ	पश्यन्	= साक्षात् करता हुआ (सच्चिदानन्दघन)
चित्तम्	= चित्त		
उपरमते	= उपराम हो जाता है		
च	= और	आत्मनि	= परमात्मामें
यत्र	= जिसअवस्थामें (परमेश्वरके ध्यानसे)	एव	= ही
		तुष्यति	= संतुष्ट होता है ॥

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥

सुखम्, आत्यंतिकम्, यत्, तत्, बुद्धिग्राह्यम्, अतीं-द्रियम्, वेत्ति, यत्र, न, च, एव, अयम्, स्थितः, चलति, तत्त्वतः ॥ २१ ॥

तथा—

अतीन्द्रियम्	= इन्द्रियोंसे अतीत	वेत्ति	= अनुभव करता है
बुद्धिग्राह्यम्	= केवल शुद्ध हुई सूक्ष्म बुद्धिद्वाराग्रहणकरनेयोग्य	च	= और
		(यत्र)	= जिसअवस्थामें
		स्थितः	= स्थित हुआ
		अयम्	= यह योगी
यत्	= जो	तत्त्वतः	= भगवत् स्वरूपसे
आत्यंतिकम्	= अनन्त	न एव	= नहीं
सुखम्	= आनन्द है	चलति	= चलायमान होता है ॥
तत्	= उसको		
यत्र	= जिसअवस्थामें		

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते

यम्, लब्ध्वा, च, अपरम्, लाभम्, मन्यते, न, अधिकम्, ततः यस्मिन्, स्थितः, न, दुःखेन, गुरुणा, अपि, विचाल्यते ॥ २२ ॥

और-

	(परमेश्वरकी-प्राप्तिरूप)	च	= और
यम्	= जिस लाभको		(भगवत्-प्राप्तिरूप)
लब्ध्वा	= प्राप्त होकर	यस्मिन्	= जिसअवस्थामें
ततः	= उससे	स्थितः	= स्थित हुआ योगी
अधिकम्	= अधिक		
अपरम्	= दूसरा (कुछ भी)	गुरुणा	= बड़े भारी
		दुःखेन	= दुःखसे
लाभम्	= लाभ	अपि	= भी
न	= नहीं	न विचाल्यते	= चलायमान नहीं होता है।
मन्यते	= मानता है		

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा

तम्, विद्यात्, दुःखसंयोगवियोगम्, योगसंज्ञितम्, सः, निश्चयेन, योक्तव्यः, योगः, अनिर्विण्णचेतसा ॥२३॥

और जो-

दुःखसंयोग वियोगम्	= दुःखरूप संसारके संयोगसे रहित है (तथा)	तम्	= उसको
		विद्यात्	= जानना चाहिये
		सः	= वह
		योगः	= योग
योगसंज्ञितम्	= जिसका नाम योग है		

अनिर्विण्णचेतसा	= न उकताये हुए चित्तसे अर्थात् तत्पर हुए चित्तसे	निश्चयेन	= निश्चयपूर्वक
		योक्तव्यः	= करना कर्तव्य है ॥

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः
मनसैवेंद्रियग्रामं विनियम्य समंततः ॥२४॥

संकल्पप्रभवान्, कामान्, त्यक्त्वा, सर्वान्, अशेषतः, मनसा, एव, इन्द्रियग्रामम्, विनियम्य, समंततः ॥

इसलिये मनुष्यको चाहिये कि—

संकल्पप्रभवान्	= संकल्पसे उत्पन्न होनेवाली	त्यक्त्वा	= त्यागकर (और)
सर्वान्	= संपूर्ण	मनसा	= मनके द्वारा
कामान्	= कामनाओंको	इंद्रियग्रामम्	= इंद्रियोंके समुदायको
अशेषतः	= निःशेषतासे अर्थात् वासना और आसक्ति सहित	समन्ततः	= सब ओरसे
		एव	= ही
		विनियम्य	= अच्छी प्रकार वशमें करके

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत्

शनैः, शनैः, उपरमेत्, बुद्ध्या, धृतिगृहीतया, आत्मसंस्थम्, मनः, कृत्वा, न, किंचित्, अपि, चिंतयेत् ॥२५॥

शनैः शनैः	= क्रम क्रमसे (अभ्यास करता हुआ)	मनः	= मनको
उपरमेत्	= उपरामताको प्राप्त होवे (तथा)	आत्मसंस्थम्	= परमात्मामें स्थित
धृतिगृहीतया	= धैर्य युक्त	कृत्वा	= करके (परमात्माके सिवाय और)
बुद्ध्या	= बुद्धि द्वारा	किंचित्	= कुछ
		अपि	= भी
		न चिंतयेत्	= चिंतन न करे

यतो यतो निश्चरति मनश्चंचलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥

यतः, यतः, निश्चरति, मनः, चंचलम्, अस्थिरम्, ततः, ततः, नियम्य, एतत्, आत्मनि, एव, वशम्, नयेत् ॥२६॥

परन्तु जिसका मन वशमें नहीं हुआ हो उसको चाहिये कि—

एतत्	= यह	निश्चरति	= सांसारिक पदार्थोंमें विचरता है
अस्थिरम्	= स्थिर न रहनेवाला (और)	ततः	= उस
चंचलम्	= चंचल	ततः	= उससे
मनः	= मन	नियम्य	= रोककर (बारम्बार)
यतः यतः	= जिस-जिस कारणसे		

आत्मनि	=परमात्मामें	वशम्	=निरोध
एव	=ही	नयेत्	=करे ॥

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

प्रशांतमनसम्, हि, एनम्, योगिनम्, सुखम्, उत्तमम्, उपैति, शांतरजसम्, ब्रह्मभूतम्, अकल्मषम् ॥

हि	=क्योंकि	एनम्	=इस
प्रशांतमनसम्	=जिसका मन अच्छी प्रकार शांत है (और)	ब्रह्मभूतम्	=सच्चिदानंदघन ब्रह्मके साथ एकीभाव हुए
अकल्मषम्	=जो पापसे रहित है (और)	योगिनम्	=योगीको
शांतरजसम्	=जिसका रजोगुण शान्त हो गया है ऐसे	उत्तमम्	=अति उत्तम
		सुखम्	=आनन्द
		उपैति	=प्राप्त होता है।

युंजन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥२८॥

युंजन्, एवम्, सदा, आत्मानम्, योगी, विगतकल्मषः, सुखेन, ब्रह्मसंस्पर्शम्, अत्यन्तम्, सुखम्, अश्नुते ॥

और वह—

विगत-कल्मषः = पाप रहित
योगी = योगी
एवम् = इस प्रकार
सदा = निरन्तर
आत्मानम् = आत्माको (परमात्मामें)
युंजन् = लगाता हुआ
सुखेन = सुखपूर्वक
ब्रह्मसंस्पर्शम् = परब्रह्म परमात्माकी प्राप्तिरूप
अत्यन्तम् = अनन्त
सुखम् = आनन्दको
अश्नुते = अनुभव करता है ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥२९॥

सर्वभूतस्थम्, आत्मानम्, सर्वभूतानि, च, आत्मनि, ईक्षते, योगयुक्तात्मा, सर्वत्र, समदर्शनः ॥

और हे अर्जुन-

योगयुक्तात्मा = सर्वव्यापी अनन्त चेतनमें एकीभावसे स्थितिरूप योगसे युक्त हुए आत्मावाला (तथा)
सर्वत्र = सबमें
समदर्शनः = समभावसे देखनेवाला योगी
आत्मानम् = आत्माको
सर्वभूतस्थम् = संपूर्ण भूतों में बर्फमें जलके सदृश व्यापक (देखता है)
च = और
सर्वभूतानि = संपूर्ण भूतोंको
आत्मनि = आत्मामें
ईक्षते = देखता है—

अर्थात् जैसे स्वप्नसे जगा हुआ पुरुष स्वप्नके संसारको अपने अन्तर्गत संकल्पके आधार देखता है वैसे ही वह पुरुष संपूर्ण भूतोंको अपने सर्वव्यापी अनन्त चेतन आत्माके अन्तर्गत संकल्पके आधार देखता है ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति

यः, माम्, पश्यति, सर्वत्र, सर्वम्, च, मयि, पश्यति, तस्य, अहम्, न, प्रणश्यामि, सः, च, मे, न, प्रणश्यति ॥ ३० ॥

और—

यः	= जो पुरुष	पश्यति	= देखता है
सर्वत्र	= संपूर्णभूतोंमें	तस्य	= उसके (लिए)
माम्	= सबके आत्मरूप मुझ वासुदेवको ही (व्यापक)	अहम्	= मैं
		न प्रणश्यामि	= अदृश्य नहीं होता हूं
		च	= और
पश्यति	= देखता है	सः	= वह
च	= और	मे	= मेरे (लिए)
सर्वम्	= संपूर्णभूतोंको	न प्रणश्यति	= अदृश्य नहीं होता है—
मयि	= मुझ वासुदेवके अंतर्गत*		

क्योंकि वह मेरेमें एकीभावसे स्थित है ॥

*गीता अध्याय ९ श्लोक ६ देखना चाहिये—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ३१

सर्वभूतस्थितम्, यः, माम्, भजति, एकत्वम्, आस्थितः, सर्वथा, वर्त्तमानः, अपि, सः, योगी, मयि, वर्तते ॥

इस प्रकार–

यः	=जो पुरुष	भजति	=भजता है
एकत्वम्	=एकीभावमें	सः	=वह
आस्थितः	=स्थित हुआ	योगी	=योगी
सर्वभूतस्थितम्	=संपूर्ण भूतोंमें आत्मरूपसे स्थित	सर्वथा	=सब प्रकारसे
		वर्तमानः	=वर्तता हुआ
		अपि	=भी
माम्	=मुझ सच्चिदानन्दघन वासुदेवको	मयि	=मेरेमें ही
		वर्तते	=वर्तता है— क्योंकि उसके

अनुभवमें मेरे सिवाय अन्य कुछ है ही नहीं ॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

आत्मौपम्येन, सर्वत्र, समम्, पश्यति, यः, अर्जुन, सुखम्, वा, यदि, वा, दुःखम्, सः, योगी, परमः, मतः ३२

और–

अर्जुन	=हे अर्जुन	यः	=जो योगी

आत्मौ-पम्येन	=अपनी सादृश्यतासे*	दुःखम्	=दुःखको (भी) (सबमें सम देखता है)
सर्वत्र	=संपूर्ण भूतोंमें	सः	=वह
समम्	=सम	योगी	=योगी
पश्यति	=देखता है	परमः	=परमश्रेष्ठ
वा	=और	मतः	=माना गयाहै ॥
सुखम्	=सुख		
यदि वा	=अथवा		

अर्जुन उवाच

योऽयं योगस्त्वया प्रोक्तः
साम्येन मधुसूदन ।
एतस्याहं न पश्यामि
चंचलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥

यः, अयम्, योगः, त्वया, प्रोक्तः, साम्येन, मधुसूदन, एतस्य, अहम्, न, पश्यामि, चंचलत्वात्, स्थितिम्, स्थिराम् ॥

इस प्रकार भगवान्के वाक्योंको सुनकर अर्जुन बोला—

मधुसूदन	=हे मधुसूदन	यः	=जो

---

* जैसे मनुष्य अपने मस्तक हाथ पैर और गुदादिके साथ ब्राह्मण क्षत्रिय शूद्र और म्लेच्छादिकोंकासा वर्ताव करता हुवा भी उनमें आत्मभाव अर्थात् अपना पना समान होनेसे, सुख और दुःखको समान ही देखता है वैसे ही सब भूतोंमें देखना "अपनी सादृश्यतासे" सम देखना है ।

अयम्	=यह		(मनके)
योगः	=ध्यानयोग	चंचलत्वात्	=चंचल होनेसे
त्वया	=आपने	स्थिराम्	=बहुतकालतक ठहरनेवाली
साम्येन	=समत्वभावसे		
प्रोक्तः	=कहा है	स्थितिम्	=स्थितिको
एतस्य	=इसकी	न	=नहीं
अहम्	=मैं	पश्यामि	=देखता हूं ॥

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ३४

चंचलम्, हि, मनः, कृष्ण, प्रमाथि, बलवत्, दृढम्, तस्य, अहम्, निग्रहम्, मन्ये, वायोः, इव, सुदुष्करम् ॥

हि	=क्योंकि	बलवत्	=बलवान है
कृष्ण	=हे कृष्ण (यह)	(अतः)	= (इसलिये)
मनः	=मन	तस्य	=उसका
चंचलम्	=बड़ा चंचल (और)	निग्रहम्	=वशमें करना
		अहम्	=मैं
प्रमाथि	=प्रमथन स्वभाववाला है (तथा)	वायोः	=वायुकी
		इव	=भांति
		सुदुष्करम्	=अति दुष्कर
दृढम्	=बड़ा दृढ़ (और)	मन्ये	=मानता हूं ॥

श्रीभगवानुवाच ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥३५

असंशयम्, महाबाहो, मनः, दुर्निग्रहम्, चलम्, अभ्यासेन, तु, कौंतेय, वैराग्येण, च, गृह्यते ॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण भगवान् बोले–

महाबाहो	=हे महाबाहो	कौंतेय	=हे कुंतीपुत्र अर्जुन
असंशयम्	=निःसन्देह	अभ्यासेन	=अभ्यास* अर्थात् स्थितिके लिये बारंबार यत्न करनेसे
मनः	=मन	च	=और
चलम्	=चंचल (और)	वैराग्येण	=वैराग्यसे
दुर्निग्रहम्	=कठिनतासे वशमें होनेवाला है	गृह्यते	=वशमें होता है-
तु	=परन्तु		

इसलिये इसको अवश्य वशमें करना चाहिये ॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः

असंयतात्मना, योगः, दुष्प्रापः, इति, मे, मतिः, वश्यात्मना, तु, यतता, शक्यः, अवाप्तुम्, उपायतः ३६

* गी० अ० १२ श्लोक ९ की टिप्पणीमें इसका विस्तार देखना चाहिये ।

क्योंकि-

असंयतात्मना	=	मनको वशमें न करनेवाले पुरुषद्वारा	यतता	=	प्रयत्नशील पुरुषद्वारा
			उपायतः	=	साधन करनेसे
योगः	=	योग	अवाप्तुम्	=	प्राप्त होना
दुष्प्रापः	=	दुष्प्राप्यहै अर्थात् प्राप्त होना कठिन है	शक्यः	=	सहज है
			इति	=	यह
			मे	=	मेरा
तु	=	और	मतिः	=	मत है ॥
वश्यात्मना	=	स्वाधीन मनवाले			

अर्जुन उवाच

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति

अयतिः, श्रद्धया, उपेतः, योगात्, चलितमानसः, अप्राप्य, योगसंसिद्धिम्, काम्, गतिम्, कृष्ण, गच्छति ॥३७॥

इसपर अर्जुन बोला-

कृष्ण	=	हे कृष्ण	अयतिः	=	शिथिल यत्नवाला
योगात्	=	योगसे			
चलितमानसः	=	चलायमान होगया है मन जिसका ऐसा	श्रद्धया उपेतः	=	श्रद्धा युक्त पुरुष

योगसंसिद्धिम्	= योगकी सिद्धिको अर्थात् भगवत् साक्षात्कारताको	अप्राप्य	=	न प्राप्त होकर
		काम्	=	किस
		गतिम्	=	गतिको
		गच्छति	=	प्राप्त होताहै ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥३८

कच्चित्, न, उभयविभ्रष्टः, छिन्नाभ्रम्, इव, नश्यति, अप्रतिष्ठः, महाबाहो, विमूढः, ब्रह्मणः, पथि ॥

और–

महाबाहो	= हे महाबाहो	इव	= भांति
कच्चित्	= क्या (वह)	उभयविभ्रष्टः	= दोनों ओरसे अर्थात् भगवत् प्राप्ति और सांसारिक भोगोंसे भ्रष्ट हुआ
ब्रह्मणः	= भगवत्प्राप्तिके		
पथि	= मार्गमें		
विमूढः	= मोहित हुआ		
अप्रतिष्ठः	= आश्रय रहित पुरुष		
छिन्नाभ्रम्	= छिन्नभिन्न बादलकी	न नश्यति	= नष्ट तो नहीं होजाता है ?॥

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९

एतत्, मे, संशयम्, कृष्ण, छेत्तुम्, अर्हसि, अशेषतः, त्वदन्यः, संशयस्य, अस्य, छेत्ता, न, हि, उपपद्यते ॥

कृष्ण	=हे कृष्ण	हि	=क्योंकि
मे	=मेरे	त्वदन्यः	=आपके सिवाय दूसरा
एतत्	=इस	अस्य	=इस
संशयम्	=संशयको	संशयस्य	=संशयका
अशेषतः	=संपूर्णतासे	छेत्ता	=छेदन करनेवाला
छेत्तुम्	=छेदन करनेके लिये (आप ही)	न उपपद्यते	=मिलना संभव नहीं है ॥
अर्हसि	=योग्य हैं		

श्रीभगवानुवाच

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥

पार्थ, न, एव, इह, न, अमुत्र, विनाशः, तस्य, विद्यते, न, हि, कल्याणकृत्, कश्चित्, दुर्गतिम्, तात, गच्छति ४०

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण भगवान् बोले—

पार्थ	=हे पार्थ	एव	=ही
तस्य	=उस पुरुषका	विनाशः	=नाश
न	=न तो	विद्यते	=होता है
इह	=इसलोकमें (और)	हि	=क्योंकि
न	=न	तात	=हे प्यारे
अमुत्र	=परलोकमें	कश्चित्	=कोई भी

कल्याण-कृत्	= शुभ कर्म करनेवाला अर्थात् भगवत् अर्थ कर्म करनेवाला	दुर्गतिम्	= दुर्गतिको
		न	= नहीं
		गच्छति	= प्राप्त होता है ॥

प्राप्य पुण्यकृतांल्लोका-
नुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे
योगभ्रष्टोऽभिजायते ॥ ४१ ॥

प्राप्य, पुण्यकृतान्, लोकान्, उषित्वा, शाश्वतीः, समाः, शुचीनाम्, श्रीमताम्, गेहे, योगभ्रष्टः, अभिजायते ॥

किन्तु वह—

योगभ्रष्टः	= योगभ्रष्ट पुरुष	समाः	= वर्षोंतक
पुण्यकृतान्	= पुण्यवानोंके	उषित्वा	= वास करके
लोकान्	= लोकोंको अर्थात् स्वर्गादिक उत्तम लोकोंको	शुचीनाम्	= शुद्ध आचरणवाले
		श्रीमताम्	= श्रीमान् पुरुषोंके
प्राप्य	= प्राप्त होकर (उनमें)	गेहे	= घरमें
शाश्वतीः	= बहुत	अभिजायते	= जन्म लेता है ॥

अथवा योगिनामेव कुले भवति धीमताम्
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४२॥

अथवा, योगिनाम्, एव, कुले, भवति, धीमताम्, एतत्, हि, दुर्लभतरम्, लोके, जन्म, यत्, ईदृशम् ॥

अथवा	=अथवा (वैराग्यवान् पुरुष उन लोकोंमें न जाकर)		(परन्तु)
		ईदृशम्	=इस प्रकारका
		यत्	=जो
		एतत्	=यह
धीमताम्	=ज्ञानवान्	जन्म	=जन्म है (सो)
योगिनाम्	=योगियोंके	लोके	=संसारमें
एव	=ही	हि	=निःसन्देह
कुले	=कुलमें	दुर्लभतरम्	=अति दुर्लभ है ॥
भवति	=जन्म लेता है		

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥४३॥

तत्र, तम्, बुद्धिसंयोगम्, लभते, पौर्वदेहिकम्, यतते, च, ततः, भूयः, संसिद्धौ, कुरुनंदन ॥

और वह पुरुष—

तत्र	=वहां	पौर्वदेहिकम्	=पहिले शरीरमें साधनकिये हुए
तम्	=उस		

बुद्धिसं-योगम् = { बुद्धिके सं-योगको अ-र्थात् समत्व बुद्धियोगके संस्कारोंको } (अनायासही)
लभते = प्राप्त हो जाताहै
च = और
कुरुनंदन = हे कुरुनंदन
ततः = उसके प्रभावसे
भूयः = फिर (अच्छी प्रकार)
संसिद्धौ = { भगवत्प्राप्ति-के निमित्त }
यतते = यत्न करता है ॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥४४

पूर्वाभ्यासेन, तेन, एव, ह्रियते, हि, अवशः, अपि, सः, जिज्ञासुः, अपि, योगस्य, शब्दब्रह्म, अतिवर्तते ॥

और-

सः = वह*
अवशः = { विषयोंके वशमें हुआ }
अपि = भी
तेन = उस
पूर्वा-भ्यासेन = { पहिलेके अभ्याससे }
एव = ही
हि = निःसन्देह
ह्रियते = { भगवत्की ओर आक-र्षित किया जाता है } (तथा)

* यहां "वह" शब्दसे श्रीमानोंके घरमें जन्म लेनेवाला योगभ्रष्ट पुरुष समझना चाहिये ।

योगस्य	= समत्व बुद्धि रूप योगका	शब्दब्रह्म	= वेदमें कहेहुए सकाम कर्मों के फलको
जिज्ञासुः	= जिज्ञासु	अति-वर्तते	= उल्लंघन कर जाता है ॥
अपि	= भी		

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥

प्रयत्नात्, यतमानः, तु, योगी, संशुद्धकिल्बिषः, अनेकजन्मसंसिद्धः, ततः, याति, पराम्, गतिम् ॥४५॥

जबकि इस प्रकार मन्द प्रयत्न करनेवाला योगी भी परम-गतिको प्राप्त हो जाता है तब क्या कहना है कि—

अनेकजन्म संसिद्धः	= अनेक जन्मों से अन्तःकरणकी शुद्धि-रूप सिद्धि को प्राप्त हुआ	संशुद्धकिल्बिषः	= संपूर्णपापोंसे अच्छी प्रकार शुद्ध होकर
		ततः	= उस साधनके प्रभावसे
तु	= और	पराम्	= परम
प्रयत्नात्	= अति प्रयत्नसे	गतिम्	= गतिको
यतमानः	= अभ्यास करनेवाला	याति	= प्राप्त होता है अर्थात् परमात्माको प्राप्त होताहै॥
योगी	= योगी		

तपस्विभ्योधिको योगी
ज्ञानिभ्योपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी
तस्माद्योगी भवार्जुन ॥४६॥

तपस्विभ्यः, अधिकः, योगी, ज्ञानिभ्यः, अपि, मतः, अधिकः, कर्मिभ्यः, च, अधिकः, योगी, तस्मात्, योगी, भव, अर्जुन ॥

क्योंकि-

योगी = योगी
तपस्विभ्यः = तपस्वियोंसे
अधिकः = श्रेष्ठ है
च = और
ज्ञानिभ्यः = शास्त्रके ज्ञान वालोंसे
अपि = भी
अधिकः = श्रेष्ठ
मतः = माना गयाहै (तथा)
कर्मिभ्यः = सकाम कर्म करनेवालोंसे (भी)
योगी = योगी
अधिकः = श्रेष्ठ है
तस्मात् = इससे
अर्जुन = हे अर्जुन (तूं)
योगी = योगी
भव = हो ॥

योगिनामपि सर्वेषां मद्गतेनांतरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥

योगिनाम्, अपि, सर्वेषाम्, मद्गतेन, अन्तरात्मना, श्रद्धावान्, भजते, यः, माम्, सः, मे, युक्ततमः, मतः ॥४७

और हे प्यारे–

सर्वेषाम्	=संपूर्ण	माम्	=मेरेको
योगिनाम्	=योगियोंमें	भजते	=निरन्तर भजता है
अपि	=भी	सः	=वह योगी
यः	=जो	मे	=मुझे
श्रद्धावान्	=श्रद्धावान्योगी	युक्ततमः	=परमश्रेष्ठ
मद्गतेन	=मेरेमें लगे हुए	मतः	=मान्य है ॥
अन्तरात्मना	=अन्तरात्मासे		

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्या-याम् योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्म-संयम योगो नाम षष्ठोऽध्यायः ॥६॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्र विषयक श्रीकृष्ण और अर्जुनके संवादमें "आत्म संयमयोग" नामक छठा अध्याय।

हरि ॐ तत्सत् हरि ॐ तत्सत् हरि ॐ तत्सत्

ॐ

श्रीपरमात्मनेनमः

अथ सप्तमोऽध्यायः ॥

श्रीभगवानुवाच

मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ।१

मयि, आसक्तमनाः, पार्थ, योगम्, युंजन्, मदाश्रयः, असंशयम्, समग्रम्, माम्, यथा, ज्ञास्यसि, तत्, शृणु ॥

उसके उपरान्त श्रीकृष्ण भगवान् बोले—

पार्थ = हे पार्थ (तूं)
मयि = मेरेमें
आसक्तमनाः = अनन्य प्रेम सेआसक्त हुए मनवाला (और)
मदाश्रयः = (अनन्यभाव-से)मेरे परायण
योगम् = योगमें
युंजन् = लगा हुआ
माम् = मुझको
समग्रम् = संपूर्ण विभूति बल ऐश्वर्यादि गुणों से युक्त सब का आत्मरूप
यथा = जिस प्रकार
असंशयम् = संशय रहित
ज्ञास्यसि = जानेगा
तत् = उसको
शृणु = सुन ॥